इच्छेयमिति तथाऽस्य कर्तृ. स्थिरत्वं कर्तृधर्मस्य संवेदनाख्यस्य स्वतः स्वादेरिव उत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्षन्ते कर्तृस्वरूपं तावत् स्वत एवायमर्थः पूर्वमपानुभूत इति प्रत्यभिज्ञाप्रत्यक्षसिद्धे अहं जानामि इत्यत्र अस्मिंस्तात्रैवममेदानीं ज्ञानमुत्पन्नमिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति अत एवैकरूपत्वेन संविदात्मनो संविन्मात्रः संविदात्मनाभ्युपगमे पूर्वं मया दृष्टमिदमपरेद्युरिदमहमदर्शमिति प्रत्यभिज्ञा च न घटते अन्ये नानुभूतस्यान्येन स्मरणप्रत्यभिज्ञानसंभवः किंचानुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेऽपि प्रतिसंधाना संभवः तद्धि वस्तुप्रतिसंधानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति नानुभूति मात्रं अहमेवेदं पूर्वमप्यन्वभूवमिति भवतोऽनुभूतेनैवानुभवितृत्वमिष्टं अनुभूतिरनुभूतिमात्रमु वेत्ति विज्ञानमात्रस्य चित्रताशून्यत्वात् निर्विषयायाः स्वतोऽनुपलम्भो न संभवतीत्युक्तं उभयथाभ्युपगतात् संविद आत्मनोऽप्युपलब्धिरपराहता अनुभूतिमात्रमेव परमार्थ इति निर्णयो हेत्वाभासाश्च निराकृताः ननु चाहं जानामीत्यस्मच्छब्दस्य प्रत्ययोऽस्ति इदमंशः प्रकाशैकरसमपि तदात्मस्वभावात्मसिद्धत्वेऽपि भा सितत्वात्प्रयुष्मदर्थत्वं तत्प्राप्तेऽहं जानामीति तित्वे एव हमन्यो मात्रातिरेकोऽप्युष्मदर्थ एवेनैतदेव अहं जानामीति धर्मिधर्मितया प्रत्यक्षमनीतिविरोधादेव किंच अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्म

आ· ज्ञानज्ञातान्येवार्थरूपः अथ घटो मयास्तं पश्यतीति योगं नो न दुःखतां स्मृतम् सुखबोधो यज्ञनं स्मरन्निदं भारी
२१ रएवमेवास्य परिद्रष्टृभिर्माः बोधकालः स्मृतावत्ताः श्रुतस्यापास्तं तत्त्वेति तस्माद्बोधनस्मात्तमतो
नुदीया २ मपादन्योन स्वात्मा विज्ञानमप्रमयः बलनिच ज्ञेनत्वेति अतः स्वयंप्रकाशो यमात्मा ज्ञानेव
नप्रकाशमात्रप्रकाशत्वादेवकस्यचिदेवमवेद्यः प्रकाशः प्रदीपादिप्रकाशवत् तस्मान्नात्मा भवितुम
हतिसंवित् संविदनुभूतिज्ञानादिशब्दाः सर्वेपि ज्ञातृज्ञानविषयशब्दार्थविदः नहि लोके वेदयोर्ज्ञा
नातीत्यादेरकर्मकस्याकर्तृकस्य च प्रयोगो दृष्टवरः पक्षोक्तं प्रत्यक्षं ज्ञातोऽहं विदे वाम्नेति तच्चेदं दृष्टवत् अ
जडत्वमितिकिमभिप्रेतं स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत् तथा सति दीपादिष्वनैकान्त्यं संविदतिरिक्त
21 प्रकाशधर्मानभ्युपगमेनासिद्धिर्विरोधश्च अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिष्वव्यभिचा
२ रान्निरस्तं यद्युच्येत स्वतोऽदिव्यभिचरितप्रकाशोपि अन्यस्मै प्रकाशमानतया घटादिवज्जडत्वेन नात्मे
ति ज्ञानं किं स्वस्मै प्रकाशते न तदपि अन्यस्मै वाहमर्थस्य ज्ञातुरवभासते अहं जानामीति वत् ज्ञानामहमिति
ज२ अतः स्वस्मै प्रकाशमानत्वरूपमजडत्वं संविद्यसिद्धं तस्मात्स्वमात्मानं प्रति स्वसत्तयैव सिद्धत्वज्जडोहमर्थ २१
एवात्मा ज्ञानस्यापि प्रकाशनात्मतया तमेव हि ज्ञानस्य जडत्वादेरिवस्वाश्रयचेतनं प्रति प्रक
० ननु दीपादिष्वेवमभिचार इति चेन्नोक्तं न प्रकाशत्वस्य ... नात्मकत्वमतिस्वसत्ताकत्वमि
त्यर्थः ननु नदीपादिषु दीपसत्ताया मापवादः पुरुषाभाववेदनाभावः सुखादयस्तु स्वसत्तायां चेधारणेत्याशयः ॥ ५

स्य ज्ञापितत्वेनाभासत्वात् पूर्वत्वाच्च। सोऽहमादित्य इत्येवं मोक्षकालाभावत्वाच्च। तेजो ह्यस्मेव नाद्यन्तरं प्रकाश
वत्वेन च स्वरूपस्याविद्याचप्रकाशकत्वात्। अन्यस्य प्रकाशत्वे वृद्धारोपनित्यः तदाप्रवृत्तत्वं च क्षेपत्वनि
वर्तनः नचान्यप्रकाश्यत्वात् एवं विपरीतोऽस्तः प्रवर्ततः प्रमेन युज्यते। अस्ति पुरुषस्तात्प्रभृतीनां विनाशप्रसंगा
त्। दीपेष्ववर्तिविपत्तिवर्तिः कदाचिदपि न स्यात्। नहि विपत्तरणस्यभावावपवारी पारवृत्तत्वं तत्सत्त्वात्
नित्यमेव न पिण्डीभूतादर्शनमन्यत् ततः पश्यन्ति पुरायदेवति येवं हि अप प्रकाशरूपा विपरीताः प्रचरंतीति
शक्यते वक्तुं। अतः सप्रभाकाश एव दीपः पतित लक्षणात्मा विन प्यतीति प्रकाशस्य क्रमेणपनिपातात्
द्विनाशे विनाशप्रसंगात्मते। यथा यां वा पश्य समीपेन प्रकाशादि प्रमोस्माति कनित्या पुपत्व विव
स्यापं प्रभृतीनामो सादित्। एवमात्मा चिद्रूपत्वे चेतन्यकरण इति। चिद्रूपत्वादित्वे प्रकाशात्मा
तथा हि कर्तृतः सकृदात्मा स्वयं प्रत्यगात्मा वा तं कृत्स्नो रसघन एव एवं वा अरे अयमात्मानन्तरो बाह्यः
कृत्स्नः प्रज्ञानघनः विज्ञानघन एव अत्रायं पुरुषः स्वयंज्योतिर्भवति। न विज्ञातेर्विज्ञातारं विजानीयाः
विद्याते अथ योऽयं वेदेति ज्ञात्मेति स आत्मा कतम आत्मा यो यं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पु
रुष एव हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः। विज्ञातारमरे केन विजानी

भा॰
२२

नोऽनुभूयमाने देहस्यैवानात्मत्वपराक्त्वजडत्वादिधर्मताश्चेति नैतदुपपद्यते देहस्यैवाचेतनत्वप्रकृतिप
रिणामित्वदृश्यत्वपराक्त्वपरार्थत्वादियोगादन्तःकरणरूपस्याहंकारस्य चेतनासाधारणस्वभावत्वाच्च
ज्ञातृत्वस्य एतद्भवति यथा देहादिर्दृश्यत्वपराक्त्वादिभिर्हेतुभिरस्मिन्नात्मप्रतीके दृष्टत्वप्रत्यक्त्वादिर्वि
विच्यते एवमन्तःकरणरूपाहंकारोऽपि तत दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यत इति अतो विरोधा
देव न ज्ञातृत्वमहंकारस्य दर्शितवत् यथा दर्पितत्वं तत्करणाहंकारस्यानाभ्युपगम्यते न च ज्ञातृत्वं विक्रि
यात्मकं ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वं ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन नित्यं नित्यत्वं चात्मनोऽन
न्त्याच्चेत्यादिषु वदति ज्ञोऽत एवेत्यत्र ज्ञः इति व्यपदेशो न ज्ञानाश्रयत्वं च स्वाभाविकमिति वक्ष्यति
अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तं स्वयमपरिच्छि
न्नमेव ज्ञानं संकोचविकासार्हमित्युपपादयिष्यामः अतः क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं
तत्तत्कर्मानुगुणतरतमभावेन वर्तते तच्चेन्द्रियद्वारेण व्यवस्थितं तमिममिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदा
यास्तमयव्यपदेशः प्रवर्तते ज्ञानप्रसरे तु कर्तृत्वमस्त्येव तच्च न स्वाभाविकं अपि तु कर्मकृतमित्यवि २२
क्रियस्वरूप एवात्मा एवंरूपाविक्रियात्मकज्ञातृत्वं ज्ञानस्वरूपस्यात्मनः एवेति न कदाचिदपि जडस्या

22

त्वमितरंप्रतिप्रकटत्वंच अतोनन्तुमिथ्याज्ञानात्मा अविद्यात्वेनाहमर्थः अथवाऽकमनुभूतिःपर
मार्थतोनिर्विषयानिराश्रयासतीआत्मानात्मनयावभासते एतत्तत्त्वेवज्ञक्ति निरधिष्ठानभ्रमानुपप
त्तेरितितद्युक्तं तथासत्यनुभवस्यानाधिकरणत्वेनात्मविनाहमर्थः प्रतीयेत अनुभूतिरहमिति प्र
त्येवस्थितभास्वरहस्याकारतयाऽजतादिरिव अत्रतस्यापवभासमानेनैवअनुभूतिरर्थोऽन्तरमहमर्थोवि
शिनष्टिदंडइवदेवदत्तं तथाऽयमनुभवाम्यहमितिप्रतीतिस्तदेवैषसम्यवस्थाननुभूतिर्विशिष्टप्रकाशाय म१
त्वनुभवाम्यहमिति यथासोदंडमाखेदंडीदेवदत्तइतिअन्यपदविशेषणमनुभूतिमात्रावलंबनः
कथमिवप्रतिज्ञायते यदप्युक्तंयस्तोहमित्यादिदेहाद्यभिमानवत्तएवज्ञातृत्वप्रतिभासनात्
८५ ज्ञातृत्वमविशिष्येति तेयुक्तं आत्मनएवाभिमतायाअनुभूतेरपिमिथ्यात्वस्यात् नहनएवप्रती
तेः सकलेतरोपमर्दितत्तज्ञाताभाषितत्वेनानुभूतेर्मिथ्यात्वमितिचेत् इत्थंसतितदबाधादेव
ज्ञातृत्वमपिनमिथ्येत्यप्युक्तं अविक्रियस्यात्मनोज्ञानक्रियाकर्तृत्वरूपज्ञातृत्वनसंभवति
अतोज्ञातृत्वंविक्रियात्मकंजडंविकारास्पदत्वाज्जपरिणामाहंकारग्रंथिस्थमितिनज्ञातृत्वमात्मनः
अपितुतःकरणरूपाहंकारस्यकर्तृत्वादिहिंरूपादिवत्दृश्यधर्मः कर्तृत्वे हस्तायोगचरत्वेचात्म

श्री°
२३

स्मातिकूल्यतः अंगत्वेन तुष्भूतित्वमात्मनि स्यात् यथा तु दशति न च रविकरनिकराणां स्वाभिव्यंग्यकर
त्वाभिव्यंग्यत्ववत्संविदभिव्यंग्यग्राहकत्वाभिव्यंग्यत्वं संविदः स्यादीयं: न त्वादिरविकरनिकराणां कर
त्वाभिव्यंग्यत्वाभावात् करतलप्रतिहतगतयोरिव घनीभूताः स्वयमेव स्फुटतरमुपलभ्यन्ते
तितद्ध्राकूल्यमात्रहेतुत्वात् करतलस्य नाभिव्यंजकत्वं किं चास्य संविद्रूपस्यात्मनो हंकारनिर्वर्त्याभिव्य
क्तिः किंरूपा न तावदुत्पत्तिः स्वतःसिद्धतया नभोत्पाद्यत्वाभ्युपगमात् नापि तत्प्रकाशनं तस्यानुभवा
तयानुभाव्यत्वात् तत एव च न तदनुभवसाधनानुग्रहः सहि हि ग्राह्येयस्येन्द्रियसंबंधहेतुत्वेन वा यथा
ज्ञातिनिजमुखादिग्रहणे व्यक्तिर्दर्पणादीनां नयनादीन्द्रियसंबंधहेतुत्वेन वाऽङ्गगतकल्मषापनयनेन
वा यथा परतत्त्वावबोधसाधनस्य शास्त्रस्य शमदमादीनां यथा मंत्रकरणानामभूमित्वान्न तत्संबंधहे
तुत्वेति किं चानुभूतेरनुभाव्यत्वाभ्युपगमेऽप्यहमर्षे न तदनुभवसाधनानुग्रहः स्व एव च: स्वा
नुभाव्यानुभवोऽस्ति प्रतिबंधकनिरसनेन भवेत् यथा रूपादिग्रहणोत्पत्तिविरोधि संतमस निरसने
न वर्तषोदीपादिना न चेह तथाविधं निरसनीयं संभाव्यते न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिविरोधि २३
किंचिदस्यहंकारापनेयमस्ति भ्रांतिग्रस्तात्मनिति चेन्न भ्रांतानस्याहंकारापनोद्यत्वानभ्युपगमात्

23

हंकारस्य स्वात्मत्वसंभवः ननु स्वभावस्याहंकारस्य चित्त्वं द्विधा भेदेन तच्छायापत्त्या न तत्संभव इति चेत्
कुत इति छायापत्तिः किमहंकारच्छायापत्तिः संविदंश उत संविच्छायापत्तिरहंकारस्य न तावत्संविदः
संविदितात्मत्वानभ्युपगमात् नाप्यहंकारस्य तस्य जडस्य उक्तनीत्या ज्ञातत्वायोगात् द्वयोरप्यचाक्षु-
षत्वाच्च न च चाक्षुषत्वात् छायायां दृष्टा पद्मरागादयः स्फटिको मणिश्च सिन्दूरसंपर्कात् लौहित्योपलब्धिरिति
चैतन्यं विधि बाधत्व स्वात्मत्वानभ्युपगमादेव ननु स्वयंप्रकाशेऽहंकारे स्वात्मत्वं न दृश्यते लौहित्यं वाऽहंकार
स्य तत्त्वेन न स्वात्मत्वासंभवादेव स्वतन्त्रता ननु स्वप्रकाशत्वे विदितात्मत्वं न दृश्यते लौहित्यं वा यदप्युक्तं उभयत्र
वस्तुतो न स्वात्मत्वमस्ति अहंकारस्यानुभूतेरभिव्यञ्जकः स्वात्मस्यापि वानुभूतिरभिव्यनक्ति आद
र्शादिवदिति तदयुक्तं आत्मनः स्वयंज्योतिषो जडरूपाहंकाराभिव्यङ्ग्यत्वायोगात् न ह्युक्तं यानो
गारवत्वादित्यहंकारो जडात्मकः स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तमिदमिति स्वयंप्रकाशा-
नुभवाधीनसिद्धयो हि सर्वेषां पदार्थानां तथा स्वप्रकाशोऽप्यहंकारोऽनुदितानस्तमितस्वरूपप्रका-
शात्मनोऽर्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यसङ्गतमिदं यदि हि स्यात् तर्हि चाहंकारानुभवयोः स्व-
भावविरोधादनुभूतेरनुभूतित्वप्रसङ्गात् न व्यञ्जकव्यङ्ग्यभावः यथोल्काया स्वरूपं एवमन्योन्यं न च स्वा

श्री॰ पादनं संभवति अथ केन ज्ञानेनाकार इति तदा प्रयतनया भातीति: ननु व्यक्तिरूपत्वात् अतोऽन्तःकरण
भा॰ भूताहंकारस्यापनयाश्च विद्युत्पत्तये वस्तुनो दोषतो वा न किंचिदहंकारणमिति नाहंकारस्य ज्ञानत्वे
२५ न वोपलब्धिर्वा तस्मात्तत एव ज्ञानं तथा निश्चयेऽहंमर्श एव प्रमाणं मानत्वान्मात्र अहंभावविगमे
न तत्र भेदयितव्यः किं सिद्धिरिति चेत् तमोगुणाभिभवात्स्मरणार्थी न भवांश्चाहंमर्शस्य विविक्तस्फुरण भा॰दा४
तिभासाभावेऽप्यवबोधादहमित्येकाकारेणात्मनः स्फुरणास्तु पुमानपि नाहंभावविरामः भवद्भि
मताभावश्च न भूतेरपि तथैव प्रयोगे विवक्तव्यं नहि तत्रोऽन्यितः कश्चिदहंभावविमुक्तार्थो न रघ्रस्यनीका
24
कारात्तत्रिरहंमत्तानस्यादितया वतिष्ठते तत्रैवं विधां स्वापसमकालामनुभूतिं परामृशति एवं हि
सुषोऽन्यितस्यापरामर्शः सुखमहमस्वाप्समिति अनेन प्रत्यवमर्शो न तदानीमप्यहंमर्शस्यैवात्मनः सुखि
त्वेतात्त्वं च ज्ञापते न च वाच्यं यदेदानीं सुखं भवति तथा तदानीमस्वाप्समित्येवाप्रतियतिरिति प्र
तद्रूपत्वात्प्रतिपत्ते नैवाहंमर्शस्यात्मनो स्थिरत्वे न तदानीमहंमर्शस्य स्थितिमानसंधानानुपपत्तिः
यतस्तत्सुषुप्तिदशायां प्रागनुभूतं वस्तु स्वप्नोऽन्यितो मयेदं कृतं मयेदमनुभूतमहमेवेदमवोचमिति
परामृशति एतावतैकालेन किंचिदहमज्ञासिषमिति च परामृशतीति चेत् ततः किं न किंचिदि

सुखमहं स्वाप्स इत्यादौ ... स्वपामि इति ... स्पर्शाद्-४

ज्ञानमेव ह्यज्ञानस्य निवर्तकं न च संविदाश्रयत्वमज्ञानस्य संभवति ज्ञानसमानाश्रयत्वात् समानविष
यत्वाच्च ज्ञानभावविषयभावविरहिते ज्ञानमात्रे नास्ति किन्त्वज्ञाने संभवितमर्हति यथाज्ञाना
श्रयत्वप्रसक्तिः न स्यात्तेन तदाश्रयेऽज्ञानाश्रयत्वे तथा ज्ञानमात्रेऽपि ज्ञानाश्रयत्वाभावेनाज्ञानाश्र
यत्वं स्यात् संविदोऽज्ञानाश्रयत्वाभ्युपगमे ध्यानं न तया भूयेत वास्तव्याज्ञानविषयत्वाभावेन ज्ञाने
नन्न तु ज्ञानाज्ञाननिवृत्तिः ज्ञाने हि स्वविषय एवाज्ञानं निवर्तयति यथा रज्ज्वादौ अतो न केनापि
कदाचित्संविदाश्रयमज्ञानमुच्छिद्यते अयं च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूप
निरूपणविरहात् ज्ञाने ज्ञानप्रागभावत्वस्य चाज्ञानस्य ज्ञानेऽपि निविरोधित्वाभावेन न न तन्निरसनेन
तज्ज्ञानसाधनानुग्रहः अतो न केनापि प्रकारेण हेतोरेण च भवतेरभिव्यक्तिः न च स्वाश्रयतया
नित्यया भिव्यञ्जनमभिव्यञ्जकानां स्वभावः प्रदीपादिषु दर्शनात् यथावस्थितपदार्थप्रतीत्यन
गुणस्वाभावाच्च ज्ञानतत्साधनयोरनुग्राहकस्य च तच्चसतः प्रामाण्यन्यायसिद्ध नवद्यो
गादिष्वेवादर्शाभिव्यञ्जकः [illegible] प्रतिफलनहेतुः सदोषहेतुः तदोषकृतत्वात् ज्ञान
स्वाभासः अभिव्यञ्जकत्वालोकादिवत् न चेहतथाहेकारेणसंविदित्वप्रकाशापातादप्यदोषा

भा० २५ नः साक्षित्वं ज्ञातैव लोके द्रष्टा साक्षीति व्यपदिश्यतेऽनुसन्धानमात्रं स्फुरति च भगवान् पाणिनिः साक्षाद्
द्रष्टरि संज्ञायामिति साक्षात् ज्ञातर्येव साक्षिशब्दः सद्य पश्यादौ ज्ञानामीति प्रतीयमानोऽस्मदर्थ एवेति कुत
स्तदानीमहमर्थोऽनवभासीत आत्मनेऽपि च मम भासमानोऽहमित्येवावभासमानस्य इति स्वापाद्यवस्थास्वप्यात्मा
प्रकाशमानोऽहमित्येवावभासत इति चेद् यत्तमोऽन्तदवस्थायामहमर्थो नानुवृत्तेनावतिष्ठते तथाह
मात्मनाश एवापवर्गः प्रकाशान्तरेण प्रतिज्ञातः स्यात् न चाहमर्थोऽधर्ममात्रं येन तद्विगमेऽप्यविद्यानिवृ
त्तावविस्वरूपमवतिष्ठेत प्रत्युतस्वरूपमेवाहमर्थ आत्मनः ज्ञानं तु तस्य धर्मः अहं जानामि ज्ञानमेवा
नमिति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव अपि च यः परमार्थतो भ्रान्त्या वा आत्मिकादिदुःखैर्दुःखितमा
त्मानमनुसन्धत्ते अहं दुःखीति स एवमेतत् दुःखज्ञानमपुनर्भवमयो प्रकृत्यमहमनाकुलः स्यामिति मोक्षेच
च्छत्तुमस्य मोक्षरागः स एव तत्साधने प्रवर्तते स्वसाधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेदपस
र्पेदसौ मोक्षकथाप्रस्तावात् ततश्चाधिकारिविरहादेव सर्वो मोक्षशास्त्रमप्रमाणं स्यात् अहमुपलत्ति
तं प्रकाशमात्रमपवर्गेऽवतिष्ठत इति चेत् किमनेनापि विनष्टेऽपि किमपि प्रकाशमात्रमवतिष्ठत इत् २५
तिमता न हि कश्चिद्बुद्धिपूर्वकारी प्रयतते अतोऽहमर्थस्यैव ज्ञातृतया सिद्धत्वात् प्रत्यगात्मत्वं स च प्रत्यगा

25

निरूपणत्वप्रतिबंधश्रुतिर्वेदन नाहमवेदिषमिति चेदि त्वमहमर्थस्यानवत्वे वैयधिकरण्यो हि सः प्रतिबंधः न किं
चिदिति निबंधस्य कृत्स्नविषये भवदभिमतानामर्थानिरपि प्रतिविहा स्यात् सुषुप्तिसमयेप्यनुसंधी
यमानमहमर्थमाकारं ज्ञानाऽरमहमिति परामर्शपुनः किं चिदवेदिषमिति वेदनेन तस्य प्रतिषिध्यमाने
नास्मिन् कालेऽप्रतिषिध्यमानानामाविनेः सिद्धिमन्वर्तमानस्य ज्ञानरहमर्थस्य चासिद्धिः मनेनैवन किं
चिदहमवेदिषमिति परामर्शेन सुषुप्तौ त्वमिममर्थं देवानांप्रियएव साधयन्नामप्यहं न ज्ञानवानि
त्य हमर्थस्यापि तदानीमनन्तसंधानेप्रतीयत इति चेत् त्वात्वमेव स्ववचनयोर्विरोधमपि न ज्ञानं निम
र्तेः अहमात्मानं ज्ञातवानित्यनुभववचनेमामिति किंचिद्ज्ञत इति चेत् साधुपृष्टं यानदृच्यते अहम
र्थस्य ज्ञातरनुवृत्तेनैस्वरूपं तिष्ठन्ते अपि त्वप्रबोधसमये त्वनुसंधीयमानस्याहमर्थस्य वर्णाश्रमादि वि
शिष्टता अहमात्मानं ज्ञातवानित्युक्ते विषयोविवेचनीयः जागरितावस्थानुसंहितज्ञात्यादि विशिष्टो
स्मदर्थो मामिति पदस्य विषयः स्वापावस्थायामसिद्धः विशदस्यानुभवेकतानन्यत्राहमर्थो हमित्यंशस्य
विषयः अत्रत्वमोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमिति वचनत्वमेव प्रकारः किंच
ज्ञानसाक्षित्वेनात्मज्ञप्तिर्हि भवदीयाभिक्रिया साक्षित्वं च साक्षात्ज्ञातृत्वमेव न च ज्ञान

कथं तर्ह्यहंकारस्य क्षेत्रांतर्भावो भगवतोपदिश्यते महाभूतान्यहंकारो बुद्धिरव्यक्तमेव चेति उच्यते स्वरूपो
भा० पदेशोऽस्मत्सु ह्यहमिति बोधोपदेशान्न थेवात्मस्वरूपप्रतिपत्तेः स्याहमित्येवशब्दस्यात्मनः स्वरूपं अव्यक्तपरि
२५ णाममेदस्याहंकारस्य क्षेत्रांतर्भावो भगवतोपदिश्यते सत्वनात्मनि देहेऽहंभावकरणहेतुत्वेनाहंकार उ
च्यते अस्य तदहंकारस्यात्मस्याभ ननद्रावेऽर्थ्वविश्रव्ययमस्यायमुमतिर्दृश्या अयमेव तदहंकार उक्तष्ट
ज्ञानावसानहेतुर्भवोपरनोमाशास्त्रगुरुकृपाहिपतयाप्रतिपद्यते तस्माद्दोषकोपेताहंबुद्धिः सा स्यादा
त्मगोचरैव यथा शरीरगोचरा तदहंबुद्धिरविद्यैव यथोक्तं भगवता वराहेण अपृतां चाप्यविद्यायाः स्वरूपं कु
लनंदन अनात्मन्यात्मबुद्धिर्येति यदि तच्चिन्मात्रमेवात्मा तदानात्मन्यात्माभिमानेऽपि शरीरे चिन्मात्रप्रति
भासः स्यान्नतु तत्प्रतिभासस्तस्माज्ज्ञाताहमर्थ एवात्मा तदुक्तं अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वया
त् अविद्यायोगतश्चात्मा ज्ञाताहमिति भासतः तिनयाचदेहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखीति अनन्यसाधनः स्वप्रकाशः व्यापी अतिसूक्ष्मतया स
र्वाचेतनान्तःप्रवेशनस्वभावः यदुक्तं दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलंबिप्रत्यक्षस्य शा २५
स्त्रबाध्यत्वमिति कोपदोषः तत्र निवक्तव्यं पद्मलतया प्रत्यक्षस्यान्यथासिद्धिः अनादिभेदवासनैव हि दोषः

त्मप्रकाशस्यऽहमित्येवप्रकाशने स्वस्मैस्वयंप्रकाशमानत्वात् योपः स्वस्मैप्रकाशने सर्वोऽहमित्येवप्रकाश
ने यथातथावभासमानत्वेन श्रुत्यवादिसिद्धः संसार्यात्माप्यः पुनरहमितिनचकास्तिनासौ स्वस्मैप्रकाश
नेयथायद्यादिः स्वस्मैप्रकाशनेनापंमुक्तात्मा सन तस्मादहमित्येवप्रकाशते नचाहमितिप्रकाशमानत्वे
ननस्यात्तत्त्वसंसारित्वादिप्रसंगः मोक्षाविरोधादनात्मा यहेत्वाचाहमन्यपस्य श्रुतानेनामत्त्वस्यात्मा
५२ नसैर्याज्ञानविपरीतज्ञानत्वाहमित्येवात्मनः स्वरूपमितिस्वरूपज्ञानस्वरूपोऽहंप्रत्ययोनाहत्वमायार
यतिक्रान्तःसंसारित्वं अचितनहि हेतोपिवाज्ञापापमेव अस्मात्स्वभावापरोक्षनिद्धत्तनिरवशेषाविद्यानामपि
वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च पश्यन्निति तद्देतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहंमनु
रभवंसूर्यश्चेति अहमेवेदंसर्वोऽस्मिमतिछ्यामीत्यादिसकलेतराज्ञानविरोधिनः सकलरूपस्यप्रमात्मभाजः
परस्यब्रह्मणोप्यनुहारोप्येवमेव हंताहमिमास्तिस्रोदेवताः बहुस्यांप्रजायेयसइमाँल्लोकानसृजतेति
पायस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः अतोऽस्मि लोकेवेदेच प्रथितः पुरुषोत्तमः अहमात्मागुडाके
श नवेवाहंजातुनास अहंकृत्स्नस्यजगतः प्रभवः प्रलयस्तथा अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते तेषां
महंसमुद्धर्तामृत्युसंसारसागरात् अहमेवपरः पिता वेदाहंसमतीतानीत्यादिषु यथदहमित्येवात्मनःस्वरूपं

श्री॰
भा॰
२१

व्यवहारोस्माकमप्यस्त्येव कोयं व्यावहारिको नाम आपातप्रतीतिसिद्धो ऽकिं मिन्निश्चितेनानवधावस्थित
प्रतिचेन्न किं तेन प्रयोजनं प्रमाणेन यावत्प्रतिपन्नेपि लौकिकबाधादेव प्रमातुः कार्याभावात् प्रयोजन
शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेपि प्रत्यक्षविषयस्य प्रागेव लौकिकबाधो दृश्यते शास्त्रविषयस्य तद्
द्वितीयस्य ब्रह्मणः पश्चात्तनबाधादर्शनेनैव निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थमिति तदवगन्तुं
अबाधितस्यापि दोषमूलस्यापारमार्थ्यं निश्चयात् एतदुक्तं भवति यथा सकलेनरकाचादिदोष
रहितचक्षुष्मान् नगरगोचरगिरिगुहाग्रवसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्यापि तिमिरदो
षाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते न च तत्र बाधकप्रत्ययोस्तीति न तन्मिथ्या न भवतीति तत्
द्विषयभूतं चन्द्रद्वित्वमपि मिथ्यैव दोषो ह्ययथार्थज्ञानहेतुः न च ब्रह्मज्ञानमविद्यामूलत्वेन बाधक
ज्ञानरहितमपि स्वविषयेन ब्रह्मणा सह मिथ्यैवेति भवति चात्र प्रयोगः विवादाध्यासितं ब्रह्म मिथ्या
अविद्याव दुष्टज्ञानविषयत्वात्प्रपञ्चवत् ब्रह्म मिथ्याज्ञानविषयत्वात्प्रपञ्चवत् ब्रह्म मिथ्या अस
त्यहेतुजन्यज्ञानविषयत्वात्प्रपञ्चवदेव न च वाच्यं स्वात्मस्वरूपस्फूर्तिज्ञानस्य असत्यस्य परमार्थशुभा २१
शुभप्रतिपत्तिहेतुभावस्वदविद्यामूलत्वेनासत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुः।

मित्येन भेदवासनायानिवृत्तिरिति चेन्न यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यज्ञानतद्वैश्येनैवर
णस्तु विरोधो नज्ञानस्य तत्र निवेश्य वक्ष्यमाणत्वात् शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वे निष्प्र
४२ योजनत्वे भेदवासनायादोषत्वनिश्चयः भेदवासनायादोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेष
बाधः वस्तुबोधित्वनिश्चय इति किं च यदि भेदवासनायाः मूलत्वेन भ्रमत्वस्य विपरीतार्थत्वं शास्त्रस्यापि तत्त्वेनैत ५४
त्वे वस्यात् वक्ष्यमाणदोषमूलत्वेऽपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन प्रबलत्वात् प्र
मत्तस्य बाधकमिति तत्र दोषमूलत्वे ज्ञाते न तिरस्कारमित्युक्तेः रज्जुसर्पज्ञानं निमित्तं भये सति भ्रान्तो
ऽयमिति परिज्ञातेन केनचित् ज्ञापितस्य पुंसो भयं निवर्तते कम्पभयानिवृत्तिदर्शनात् शास्त्रस्य वेदोषमूलत्वप्र
तिपत्तिवेलायामेव ज्ञाते श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः
अविच्छेदेन प्रवृत्तमेतच्चासंभाव्यमानदोषप्रसक्तत्वेन संभाव्यमानदोषनिमित्तकेनानुगतत्वेन तावन्मनः
सिद्धान्ते निरस्तनिखिलभेदविशेषानुभूतिरिममर्थमवगमयति तस्मात् सर्वविषयविरक्तता च शास्त्र
पक्षपातविरहाच्चेनापीह यत्कश्चन दोषमूलत्वेन विपरीतार्थज्ञाननकल्पनादेवनान्यान्यपि प्रमा
णानि अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः ननु स्यादेवाविकल्पप्रमाणप्रमेय

न बुद्धेः सत्यत्वाद्दोषाभावो दोषो रेफग्रहणमात्र उभयोर्वर्णबुद्धित्वाविशेषान्न रेखापाश्वविद्यमानव-
र्णात्मनो यायत्वेनैकस्यामेव रेखायामविद्यमानस्यैव वर्णात्मकत्वस्य सत्वमत्वा हेकरेखादर्शनात्सर्वत्र वृत्तिप्र-
तिपत्तिः स्यात् अर्थोपि विशेषे वर्णवदि शङ्कसंकेतेन वस्तुना ग्रास्यरेखाविरोधे श्रोत्रग्राह्यवर्णविरो-
धे संकेतेन वर्णत्वाद्रेखाविशेषा वर्णविशेषबुद्धिहेतवितिं इतरस्त्वसत्यादेव सत्यप्रतिपत्तिः रेखायाः
संकेतस्य च सत्यत्वात् रेखागवयादपि सत्यगवयबुद्धिः सादृश्यनिबंधना सादृश्यं च सत्यमेव नैवं
कल्पस्य शाखस्यनादविरोधेनार्थविशेषभेदबुद्धिहेतुत्वमसत्यात्सत्यप्रतिपत्तिः नानृतानादाभिव्य-
क्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यञ्जयस्वरूपेणार्थविशेषैः सह संबंधग्रहणवशाद्भेदबुद्धिप्र-
तिहेतुत्वात् शब्दस्यैकरूपत्वमपि न साधीयः गकारादेर्वाचकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात् अतोऽ
सत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा नन्वनृतात्स्वप्नज्ञानात्कुत्सममवदसत्यत्वं प्राग
द्वैतज्ञानात्सद्बुद्धिबोध्यत्वा दुष्टत्वेन तत्त्वज्ञानेऽप्यसत्यत्वं शास्त्रस्य न तदा शास्त्रं निरस्तनिखिलभेदविज्ञानात्र
ब्रह्मज्ञानोपायो यदोपायः तदास्त्येव शास्त्रमसत्यमितिबुद्धिः नैवं असति शास्त्रे स्ति शास्त्रमिति बुद्धेर्मिथ्या २१
त्वात् ततः किमिदं ततः मिथ्याभूतशास्त्रजन्यज्ञानस्यापि मिथ्यात्वेन तद्विषयस्यापि ब्रह्मणो मिथ्यात्वं

भावोनविरुद्धमिति साधकत्वानवधारणस्य त्वाभावंत् तत्र हि विषयाणामेव मिथ्यात्वे तेषामेव हि बाधो दृश्यते
न ज्ञानस्य नहि मयाश्व प्रवेत्नावामनुभूतं तत्रा नमिहूत न विद्यत इति कस्यचिदपि प्रत्ययो नायतेन दर्शनेन
विद्यते अर्थोनसंनीतिवाधकप्रत्ययः मायाविनाम ज्ञोपपादितभवं मायामयत्वान् सत्यमेव प्रतीतेर्भ
द्यस्य चहेतुः तत्रापि ज्ञानस्याबाधितत्वात् हि घटे हि यदि दोषजन्यं रज्ज्वादौ सर्पादि विज्ञानं सत्यमे
व भयादिहेतुः सत्यैवारस्टेपि ज्ञात्मनि सर्पभ्रं तिथा नात दृष्टेर्बुद्धिः सत्यैव शंकादिव बुद्धिर्भ्र
मरहेतुभ्रान्तस्तु भ्रमएव जलादौ मरीच्यादि प्रतिभासो वस्तुभूतमतत्वगतविशेषविसंवादहेतुः एतेषां स
वेदनानां भवति मनोरथोक्तियाकारिता च सत्यत्वमवसीयते हस्त्यादीनामभावे कथं तद्दृढः स्वप्ना
भवतीति चेत् तेन हुद्धीनां तावलेवनत माननिषमान् अर्थस्य प्रतिभासमानत्वमेव ग्राह्यत्वं नत
योलिंगं प्रतिभासमानता चास्य वेदनावशात् सतत्वाधितानामप्यवसीयते भवान्तिलादिबुद्धिः सत्ये २३
व सम्यक् रेखपावर्णी प्रतिपन्नापि नानुहृद् लक्ष्यबुद्धिर्बाधाः समतात् ननु वर्णात्मना प्रतिपन्ना
रेखावर्णा बुद्धिहेतवो वर्णात्मतात सत्या नैवं वर्णात्मतायास्तत्स्वाधारप्रत्यायता योगात् असतोऽ
निरूपाख्यस्य प्रत्यायकत्वेन दर्शनमनुपपन्नं च अपत्तस्यां वर्णबुद्धेरुपायत्वं एवं तर्हि सत्यात्सत्यबुद्धिर्नसा

श्री॰ त्तैर्गुणविशेषणाकारप्रत्यनीकाकारैर्वा एकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोऽवश्याश्रयणीयः। ऐक्योक्त
भा॰ विशेषः। एकस्मिन्नेव पदानां मुख्यार्थता अपरस्मिंश्च। तेषां लक्षणा। तथा ज्ञानादीनां प्रत्यनीकता वस्तु
२९ स्वरूपमेव एकेनैव पदेन स्वरूपप्रतिपत्तिमिति पदान्तरप्रयोगवैयर्थ्यात्। तथा सति सामानाधिकरण्यासि
द्धिश्च एकस्मिन् वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्। नैकस्यैवार्थस्य विशेषणभेदेन
विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि। एकस्यैव वस्तुनोऽनेकविशेषणविशिष्ट
ताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामाना
धिकरण्यमिति शाब्दिकाः। यदुक्तम् एकमेवाद्वितीयमित्यत्राप्यद्वितीयपदेन गुणतोऽपि सद्वितीयता न सहते
ती अतस्सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयं कारण
तयोपलक्षिततस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते सत्यं ज्ञानमनन्तं ब्रह्मेति। अतो लिलक्षयिषितं
ब्रह्म निर्गुणमेव। अन्यथा निर्गुणं निरञ्जनमित्यादिभिर्विरोधश्चेति। तदनुपपन्नं। जगदुपादानस्य ब्र
ह्मणः स्वव्यतिरिक्ताधिष्ठानान्तरनिवारणेन विचित्रशक्तियोगप्रतिपादनपरत्वादद्वितीयपदस्य तथै
व विचित्रशक्तियोगमेवावगमयति तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिरविशेषेण हि

यथा पटादिषु आगतेष्वीनवा घटजन्मादिज्ञानस्यापि कारणे नं न हि यस्यास्ते यतिनियमातं पश्चात्तनवा
पादर्शनं चासिद्धं एतन्मते वस्तुनि मितिवादोऽनन्तुस्यापि बाधदर्शनात्तत्त्वं तिमूलमिति चेन्न एतदपि
भ्रांतिमूलमिति [illegible] पाश्चात्यबाधादर्शनात्तस्यैवेत्यलम् । प्रतिष्ठितकुतर्कोपरि हसनेन प्रकृतं
वेदांतवाक्यानि निर्विशेषवस्तुनैकरूपवस्तुमात्रप्रतिपादनपराणि सदेव सोम्येदमग्र आसीदित्येव
मादौ नीतिं तत्र एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सत्कुलेभ्यस्य परस्य ब्रह्मणो जग
दुपादानत्वनिमित्तत्वं सर्वज्ञत्वं सर्वशक्तियोगः सत्यसंकल्पत्वं सर्वान्तरत्वं सर्वाधारत्वं सर्वनियमनमि
त्याद्यनेककल्याणगुणविशिष्टतां कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्य एवं भूतत्र ह्यात्मकत्वमसी
१५ तिश्वेतकेतुं प्रत्युपदेशपरं तत्त्वमसीत्यादिवाक्यं [illegible] प्रपंचितमायमर्थो वेदार्थसंग्रहे श्रीभाष्यादिभाष्यादिकरणेनि
पुणतरं मयापादितश्यामः अथ परापयात इत्यत्रापि गम्यतस्मिन्नापि प्राकृतान्हेयगुणान्प्रतिषिद्धानि
त्वा॰३ त्यत्वविभुत्वसूक्ष्मत्वसर्वगतत्वमयतयोनित्वं सर्वज्ञादिकल्याणगुणयोगः परस्य ब्रह्मणः प्रतिपादितः
सत्यज्ञानमनन्तं ब्रह्मेत्यत्रापि सामानाधिकरण्यस्यानेकविशेषणविशिष्टैकार्थाभिधानव्युत्पत्त्या न निर्विशे
षवस्तुसिद्धिः प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं हि सामानाधिकरण्यं तत्र सत्यज्ञानादिपदानां मुख्यार्थैर्गुणैस्त

भा० ष्टि कीज्ञानबलक्रियावत्त्वम् आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकाम
३. स्सत्यसंकल्प इत्याद्याः श्रुतयो ज्ञानत्वप्रभृत्यानन्तकल्याणगुणान् ज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभावि
कान्वदंति समस्तहेयगुणविरहितानां च निर्गुणवाक्यानां सगुणवाक्यानां च विषयमपहतपाप्मे
त्यादपिपास इत्यंतेन हेयगुणान्प्रतिषिध्य सत्यकामः सत्यसंकल्प इति ब्रह्मणः कल्याणगुणान्विद
धतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य मिथ्याविषयताश्रय
णमपि नाशंकनीयं भीषास्माद्वातः पवत इत्यादिना ब्रह्मगुणानारभ्य ते ये शतमित्यनुक्रमेण दे
वत्वानंदातिशयमुक्त्वा यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वानिति ब्रह्मणः क(
त्यष ल्याणगुणानं मत्यादरेण वदतीयं श्रुतिः सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति ब्रह्म
वेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानंत्यं ब्रवीति विपश्चिता ब्रह्मणा सह स
र्वान्कामानश्नुते काम्यंत इति कामाः कल्याणगुणाः ब्रह्मणा सह तद्गुणान्सर्वानश्नुत इत्यर्थः
दहरविद्यायां तस्मिन्यदन्तस्तदन्वेष्टव्यमिति वद्गुणप्राधान्यवचने सहशब्दः फलोपासनयोः प्र ३.
कारे वा यथाक्रतुरस्मिन्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुत्यैव सिद्धं यस्मादनंत

नीयमित्यनेकेनिमित्तान्तरमात्रनिषेधः कथं तावत्तुगिचेत् सिद्धत्वोत्कर्षेण उपादानकारणता तत्सदेव सोम्ये
दमग्र आसीदेकमेवेति प्रतिपादितं कार्यस्येति स्वाभाव्येन बुद्धिस्थानिमित्तान्तरमिति तदेवाद्वितीयपदेन
निषिध्यत इत्यवगम्यते सर्वनिषेधे हि स्वाभ्युपगतासिद्धान्तविरोधादपसिद्धान्तापत्तिः स्यात् सर्वेषा
त्वात्प्रत्यया पश्चात्प्रभवतीति विपरीतफलः सर्वेषामस्य कारणगुणान्वितानां सर्वज्ञत्वादीनां गुणानामन्तर्भाव
संस्कारदेहत्वात् अतः कारणवाक्यस्वाभाव्यादपि सत्यं ज्ञानमनन्तमद्वैतमनेन सविशेषमेव प्रतिपाद्यत इति
विज्ञायते न च निर्गुणवाक्यविरोधः प्राकृतहेयगुणविषयत्वात्तेषां निर्गुणं निरञ्जनं निष्कलं निष्क्रियं
शान्तमित्यादीनां ज्ञानमात्रस्वरूपवादिनोऽपि प्रकृतयोरसमर्थो ज्ञानस्वरूपतामभिदधति न तावद्विशे
षज्ञानमात्रमेव तत्त्वं ज्ञानस्यैव ज्ञानस्वरूपत्वात् ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपादि
वदित्युक्तमेवत्वात् तत्त्वमसीति सर्वोपात्ततयोपदेशः सर्वं खल्विदं तज्जलान् सेयं देवतैक्षत स ईक्षत लोका
न्नु सृजा इति नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ज्ञाज्ञौ द्वावजावीशानी
शौ तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतं पतिं पतीनां परमं परस्तात् विदाम देवं भुवने
शमीड्यं न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभा

श्री·
भा·
३१ परिहृतं ज्ञानमेव ब्रह्मन्न कुलमानंदमित्युच्यते विज्ञानमानंदं ब्रह्मेत्यानंदस्वरूपमेव विज्ञानं ब्रह्मेत्यर्थः अत
एव भवतामेकरसता अस्य ज्ञानस्वरूपस्यैव ज्ञानत्वमपि स्फुतिशतसमधिगतमित्युक्तं नह्येवमेव कोश
ण आनंदः आनंदं ब्रह्मणो विद्वानित्यादिव्यतिरेकनिर्देशात् नानंदमात्रं ब्रह्म अपि त्वानंदि ज्ञानत्वमेव ज्ञा
नंदित्वं परिहृतं यत्र हि द्वैतमिव भवति नेह नानास्ति किंचन मृत्योः स मृत्युमाप्नोति य इह नानेव प
श्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति भेदनिषेधो बहुधा दृश्यत इति तत्र ब्रह्मस्वज गतो ब्र
ह्मकार्यतया तदंतर्यामिकतया च तदात्मकत्वेनैक्यात् प्रत्यनीकनानात्वं प्रतिषिध्यते न पुनर्बहु स्यां
प्रजायेयेति बहुभवनसंकल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतं नानात्वनिषे
धे हि प्रत्यक्षार्थविषयेति चेन्न प्रत्यक्षादिसकलप्रमाणानवगतनानात्वं उपास्यं ब्रह्मणः प्रतिपाद्य
तदेव बाध्यत इत्युपहास्यमिदं यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीति ब्रह्मणि
नानात्वं पश्यतो भयप्राप्तिरिति यदुक्तं परिहृतं सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीतेति तत्र ३१
नानात्वानुसंधानस्य शांतिहेतुत्वोपदेशात् तथाहि सर्वस्य जगतः उत्पत्तिस्थितिलयकर्मत्वात्
दात्मकत्वानुसंधानेनाशांतिर्विधीयते अतो यथावस्थितदेव तिष्ठस्य ब्रह्मस्यावतारादिभेदभिन्नं जग

स्यमतं अविज्ञातं विजानतामिति ब्रह्मणो ज्ञानाविषयत्वं उक्तं इति चेन्न ब्रह्मविदाप्नोति परं ब्रह्म वेद ब्रह्मैव भव
तीति ज्ञानाभावे मोक्षो न स्यात् असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु
रिति ब्रह्मविषयज्ञानासद्भावस्याभावापत्त्यापात्तिश्चेत्युच्यते अतो ब्रह्मविषयवेदनमेवाथवागो
पसर्गोऽपि न घटेदिति ज्ञानं चायावन्नामकं उपास्यं च ब्रह्म समगन्तं प्रतिबुद्धं यतो वाचो निवर्तन्ते अप्राप्य म
नसा सहेति ब्रह्मणो वेदनस्यापि निषेधः तत्र वाङ्मनसयोरेतावदिति परिच्छेदायोग्यत्वमवगतं न ब्रह्मैताव
दिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातमिति मननमनुक्तं श्रुतिरिक्तज्ञानाद्ब्रह्मणः अन्यथा यस्यामतं तस्य
मतं विज्ञातमविजानतामिति ब्रह्मण्यनन्तत्वविज्ञानवत्त्वं चानेन तद्वैव विरुध्यते यत्र नान्यत् पश्यति नान्यच्छृणोतीति श्रुतेः इ
दमेतेनेति विकृतद्रष्टारं मन्तारं च प्रतिषेधतीति न ह्यन्तरेण कर्तारं व्यवहारो यतोऽतिन्नयाज्ञानरज्ञानस्वरूपतो ब्र
ह्मसिद्धाः स्वानन्दात्मानं पश्येः नमन्तीया अपि तु द्रष्टारं मन्तारं मध्यात्मानं दृष्टिमन्तिरूपमेव यश्चपरि
त्यज्य दृष्टीति परिनष्टे अन्यथा दृष्टेर्द्रष्टारमन्ते मन्तारं जीवात्मानं प्रतिविशिष्टः सर्वेभ्यः तानन्तात्मानं पर
मात्मानमेवोपास्वेति वाक्यार्थः मतायाविज्ञातारमरे केन विजानीयादित्यादिज्ञानं तच्छ्रुतिविरोधप्र
ज्ञानं दोषस्तेत्यानेद्रमात्रमेवब्रह्मस्वरूपप्रतीयतः इति प्रज्ञानं ज्ञानाश्रयस्य ब्रह्मणो ज्ञानस्वरूपमिति

श्री० भा० ३२ यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः ससर्वभूतप्रकृतिंविकारा
न्गुणादिदोषांश्चमुनेव्यतीतः अतीतसर्वावरणोखिलात्मातेनास्तृतंयद्भुवनान्तराले समस्तकल्याणगु
णात्मकोसौस्वशक्तिलेशोद्धृतभूतसर्गः इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोसौ तेजो
बलैश्वर्यमहावबोधःसुवीर्यशक्त्यादिगुणैकराशिः परःपराणांसकलानयत्रक्लेशादयःसन्तिपरावरेशे
सईश्वरोव्यष्टिसमष्टिरूपोव्यक्तस्वरूपःप्रकटस्वरूपः सर्वेश्वरःसर्वदृक्सर्ववेत्तासमस्तशक्तिःपरमेश्वरा
ख्यः संज्ञायतेयेनतदस्तदोषंशुद्धंपरंनिर्मलमेकरूपं संदृश्यतेवाप्यवगम्यतेवातज्ज्ञानमज्ञानमतोन्यदु
क्तं शुद्धेमहाविभूत्याख्येपरेब्रह्मणिशब्द्यते मैत्रेयभगवच्छब्दःसर्वकारणकारणे संभर्तेतितथाभर्ताभ
कारोर्थद्वयान्वितः नेतागमयितास्रष्टागकारार्थस्तथामुने ऐश्वर्यस्यसमग्रस्यवीर्यस्ययशसःश्रियः
ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा वसन्तितत्रभूतानिभूतात्मन्यखिलात्मनि सचभूतेष्वशेषेषुवका
रार्थःततोव्ययः ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः भगवच्छब्दवाच्यानिविनाहेयैर्गुणादि
भिः एवमेषमहाशब्दोमैत्रेयभगवानिति परमब्रह्मभूतस्यवासुदेवस्यनान्यगः तत्रपूज्यपदार्थोक्ति
परिभाषासमन्वितः शब्दोयंनोपचारेणत्वन्यत्रह्युपचारतः समस्तापिजन्यस्यैतान्यपदत्रयप्रतिष्ठिताः त राम ३२

32

द्रूपात्मकस्थित्यनुसंधानस्य शांतिरेतत्पर्यायमयमाश्रित्य तत्तेन तन्मयदेहत्वप्रसंगः एवं तर्हि यत्स्वभ
वं भवतीति किं वचनेन पदार्थो वेषण तत्स्थित्यन्तरूपेण तात्म्यं निरूढं निजपदे भयं प्रति त्यागविंदते यथासौ
भयं गतो भवतीत्यभयप्राप्तिरेतत्तेन नवरसाणि पाप्रतिष्ठामिहितानस्याविद्वे देभयं भवतीति यथोक्तं
महर्षिभिः यन्मूर्तेलूनं च तो यिवा सरे ताने विंम्ये ताहानित्वन्मद्विक्रिडे तथाऽतिस्सा च विक्रियेत्या
दिवस्त्रणि प्रतिष्ठाया भंतरमेवकाशो विके दएव यदुक्तं नस्यानतोपीति सर्वविशेषरहिते तत्वं स्थितिव
स्तीति तत्स्वविशेषं सोधेवहितत्वं वदति मायामंतं विविच स्वामानामप्पयुगनं जागरितावस्था
न्नभूतपदार्थौ वैधमोणमायामा तत्वमव्यक्त इति पारमार्थिकत्वमेव वदति स्वतिश्चगाणपोरथिनिर्विघ्नो
वस्तान्मात्रमेव परमार्थो न्यस्यापारमार्थिकमिति प्रतीयत इति परमिदि तत्र स्तुतं यो मामजमनादिं
च वेत्ति लोकमहेश्वरं मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः न च मत्स्थानि भूतानि पश्य मे योग
मैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा मत्तः प
रतरं नान्यत्किंचिदस्ति धनंजय मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव विष्टभ्याहमिदं कृत्स्नमेकांशे
न स्थितो जगत् उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः

श्रीभा तिसंबन्धात् तथा तिरोहितत्वाच्च शक्तिः देवतासंहिता सर्वभूतेषु भूपालनतायत्स्येन वर्तते स्वधाम्नं च पु
३३ मांश्चैव सर्वभूतात्मभूतया विष्णुशक्त्या महाबुद्धेस्तौ संश्रयधर्मिणौ तयोः सेवष्टम्यभावकारणं स
श्रयस्य च यथासक्तोजलेवातो विभर्ति कणिकाशतं शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्म
नः तदेतद्द्वयं नित्यं जगन्मूलं निवराखिलं आविर्भावतिरोभावजन्मनाशविकल्पवत् ' इति अतिताप
रं ब्रह्मस्वभावत एव निरस्तनिखिलदोषगंधं समस्तकल्याणगुणात्मकं जगदुत्पत्तिस्थितिसंहारा
न्तः प्रवेशनियमनादिलीलं प्रतिपाद्यकृत्स्नस्य चिदचिद्वस्तुनः सर्वावस्थावस्थितस्य पारमार्थिकस्यै
श्रा वपरस्य ब्रह्मणः शरीरतया रूपत्वं शरीररूपतत्वांशोक्ति विभूत्यादिशब्दैस्तत्सामानाधिकर
33 ण्येन चाभिधायतद्विभूतिभूतस्य चिदचिद्वस्तुनः स्वरूपेणावस्थितिं प्रचितिस्मृतपादेवतास्वरूपेणाव
स्थितिं चोक्ताऽऽत्र तावस्थायां शुभेतरपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वानन्त
संथानमविरूपादौकारतयानुसंधानं च प्रतिपादितमिति परंब्रह्मस्वविशेषणत्वेन तद्विभूतिभूतं जगद ३३
पि पारमार्थिकमेवेति ज्ञायते प्रत्यस्तमितभेदमित्यत्र देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्ट
स्यात्मनः स्वरूपं तत्कृतभेदरहितत्वेन तद्देवत्वादि विदेवादि शब्दागोचरं ज्ञानैकगुणमात्रस्वसंवेद्यं

२१

द्विधा रूपं वै रूपं रूपमन्यदिदमेव तत् समस्तशक्तिरूपाणि तत्करोति जनेश्वर देवतिर्यङ्मनुष्याख्यचेष्टावन्ति

स्वलीलया जगतामुपकाराय न सा कर्मनिमित्तजा चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका एवंप्र

कारममलं नित्यं व्यापकमक्षयं समस्तहेयरहितं विष्ण्वाख्यं परमं पदं परः पराणां परमः परमात्मात्मसंस्थि

तः रूपवर्णादिनिर्देशविशेषणविवर्जितः अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः वर्जितः शक्य

ते वक्तुं यः सदास्तीति केवलं सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततः स वासुदेवेति विद्वद्भिः परिप ७५

ते तद्ब्रह्म परमं नित्यमजमक्षरमव्ययं एकस्वरूपं च सदा हेयाभावाच्च निर्मलं तदेव सर्वमेवैतद्व्यक्ताव्य

क्तस्वरूपवत् तथा पुरुषरूपेण कालरूपेण च स्थितं प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी

पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि परमात्मा च सर्वेषामाधारः परमेश्वरः विष्णुनामा स वेदे

षु वेदान्तेषु च गीयते द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते

अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणः

शक्तिस्तथेदमखिलं जगत् विष्णुशक्तिः पराप्रोक्ता क्षेत्रज्ञाख्या तथापरा अविद्या कर्मसंज्ञान्या

तृतीया शक्तिरिष्यते यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा संसारतापानखिलानवाप्नोत्य

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतस्तमेर्य स्वरूपेण भ्रान्तिदर्शन तेऽस्यति ८५

श्रीभा० येनेयूहितोपायानां स्वस्वरूपमापन्नानां च स्वतः शुद्धिर्विद्यमानं भगवता शौनकेन शुभाश्रयता निषिद्धा आब्रह्मस्तं
३४ बपर्यन्ता जगदन्तर्व्यवस्थिताः प्राणिनः कर्मजनितसंसारवशवर्तिनः यतस्ततो न ते ध्याने ध्यानिनामुपका
रकाः अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः नैसर्गिकोन
दैवोधः तेषामप्यस्त्यतो यतः तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवदित्यादिना परस्य ब्रह्मणो विष्णोः स्वरूपं
स्वासाधारणमेव शुभाश्रयत्वमुक्तं अतो न नमेदायत्वाय प्रतीयते ज्ञानस्वरूपमित्यत्रापि ज्ञानव्यतिरिक्तार्थ
जातस्य कृत्स्नस्य मिथ्यात्वं प्रतिपाद्यते ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणावभासो भ्रान्तिरित्ये
तावन्मात्रवचनात् नहि शुक्तिकायां रजततयावभासो भ्रान्तिरित्युक्ते नैति कृत्स्नस्य रजतजातं मिथ्या भवति ज
गद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेः ब्रह्मणो ज्ञानस्वरूपस्यार्थाकारता भ्रान्तिरित्युक्ते सत्यर्थजा
तस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेन्न अखिलतयास्य परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखि
लदोषगंधस्य समस्तकल्याणगुणात्मकस्य महाविभूतेः प्रतिपन्नतया तस्य भ्रान्तिदर्शनासंभवा
त् सामानाधिकरण्येनैक्यप्रतिपादनं च बाधासहमविरुद्धं चेत्यनन्तरमेवोपपादयिष्यते अतोयमपि ३४
श्लोको नार्थस्वरूपस्य बाधकः तथाहि यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्य

यद्युक्तकर्मरूपाविद्यावेष्टितत्वमिमाशक्तित्वं परमेश्वरस्य=

शुभाशुभानुभयमेतत्=

योगाङ्गुष्ठमनसोर्योगेचरत्वमुच्यते तस्य येनैव प्रपञ्चाप्यलापः कथमिदमवगम्यत इति चेन्नत इत्युच्यते अस्मिन्नक
रणेसंसारैकमेवजनता यागमभिधायगयोगावयवानप्रत्याहारपर्यन्तं ध्यानाभिधायपरतामिहार्थं शुभा
शुभेवकर्मपरस्परत्रसत्तो विस्माः शक्तिशक्तिमिपेयुं रूपद्वयम्मतमूलं विभागेन प्रतिपाद्य तृतीय पञ्चाति
रूप कर्माख्याः विद्यावेष्टितमविहितीष्ठं हेतुवासमूर्त्या विभागं भावनात्र पातियाद शुभमित्युक्ता
द्वितीयस्य कर्माख्याविद्याविरहितो विद्युतस्पत्तानेकाकारस्यामूर्त्या विभागस्यनिष्पन्नत्वाति शुक्तरूप=
स्यापिईश्वरादेव नैरन्तर्यत्स्यर्थः=
शेषत पायोगाङ्गुष्ठमनसो नारलेवनतया ख्यातः शुद्धिविरहाच्च शुभाशुभत्वं प्रतिविद्यापरशक्तिरूपमि
दममूर्तमपरशक्तिरूपं हेतुवासमूर्तं च परशक्तिरूपस्यात्मनः हेतुत्वतापत्तिहेतुभूततृतीयप्र
ज्ञाख्यकर्मरूपाविद्यावेष्टितत्व कि तयाप्ययं भगवदसाधारणमादित्यवर्णं मित्यादि वेदान्तसिद्धम
नीरूपं शुभाशुभयात्मकं अनवच्छिन्नसत्तस्वरूपस्य शुभाशुभत्वानहेतुं तावत्क अत्रमसितभेदं यद्दितीया
पुच्यते तथाहि ततयोगाङ्गुष्ठाशाकां पवित्रयित्वं यतः द्वितीयविभक्त्यापयोनिष्पत्ति पदं पदं स
मस्ताशक्तयश्चैतानपयत्र प्रतिष्ठिताः तद्धि शरणं वैरूप्यरूपमनन्यहेतुमिहृदिति तथा चेत
र्हि लवनकादीनां जगदन्तर्वर्तिनाम विद्यावेष्टितत्वेन शुभाशुभपत्वानहेतामप्युक्तावदानामेवपश्याद्यो

कृत्स्नं च जगत्तच्छरीरतया तत्प्रकारमेव तस्माद्यन्मयमित्यस्य प्रतिवचनं जगच्च स इति सामानाधिकरण्यं जग
द्ब्रह्मणोः शरीरात्मभावनिबन्धनमिति निश्चीयते अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेऽभ्युपगम्यमाने स
र्वाण्येतानि प्रश्नप्रतिवचनानि न संगच्छन्ते तु हि रत्नरूपं कात्स्न्येन च परास्तेन संगच्छन्ते तथाहि सति प्रपंचभ्रमस्य
किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्यैव निर्विशेषज्ञानमात्रमित्येवंरूपमेकमेवोत्तरं स्यात् जगद्ब्रह्मणोरे
कद्रव्यतयैव सामानाधिकरण्ये सत्यसंकल्पत्वादिगुणकलानन्तानिखिलहेयप्रत्यनीकता च बाध्येत सर्वा
शुभास्पदं च ब्रह्म भवेत् आत्मशरीरभाव एवेदं सामानाधिकरण्यमुख्यवृत्तमिति निरूप्यते अतो विष्णोः सका
शादुद्भूतं जगत्तत्रैव संस्थितं स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च स इति संग्रहेणोक्तमर्थं परः पराणामित्या
रभ्य विस्तरेणोक्त्वा परं ब्रह्मभूतं भगवन्तं विष्णुमेतैरेवरूपैरवस्थितं अविकारायेति श्लोकेन प्रथमं प्रणा
म्य तमेवाह हिरण्यगर्भस्वावतारशंकररूपत्रिमूर्तिप्रधानकालदेवमनुष्यसमष्टिव्यष्टिरूपेणावस्थितं च नमस्क
रोति तत्र ज्ञानस्वरूपमित्ययं श्लोकः तेत्रज्ञव्यष्ट्यात्मनावस्थितस्य परमात्मनः स्वभावमाह तस्मा
न्नात्र निर्विशेषवस्तुप्रतीतिः यदि निर्विशेषज्ञानरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रं तर्हि नि ३५
र्गुणस्याप्रमेयस्य शुद्धस्यामलात्मनः कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यत इति चोद्ये शक्तयः स

नो वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणांसकलशास्त्रानुगतस्य वाक्यार्थस्याल्पभागस्य वर्णादुरवगमत्वेनतेन
विनानिःश्रेयसयोगात् उपबृंहणं हि कार्यं ४५

त्मिसंक्षिप्तं तत्र हि निश्चितमवगतं हृदये निजगज्जन्मादिकारणं ब्रह्मैव स्थितं सति इतिहासपुराणाभ्यां वेदं
समुपबृंहयेत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यतीति शास्त्रेणास्यार्थस्येतिहासपुराणाभ्यामुपबृंह
णं कार्यमिति ज्ञायते उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिम्ना साक्षात्कृतवेदतत्त्वार्थानां
मेव तत्त्वज्ञत्वस्य वसिष्ठपराशरव्यासवाल्मीकिप्रभृतीनां परमार्षाणां तत्तल्लोभवाक्यैः परावगतस्वावगतवेदार्थो
पबृंहणमिह च मैत्रेयः परिपप्रच्छ सोऽपि कामिपर्मणि यथोक्तवक्ता यथा जगत् बभूव भूयश्च यथा महाभा
गा भविष्यति यन्मयं च जगद्ब्रह्मन् यतश्चैतच्चराचरं लीनमासीद्यथा यत्र लयमेष्यति यच्चेत्यादिना तत्र ब
सस्वरूपविशेषतद्विभूतिभेदप्रकारतत्प्राप्त्युपायतत्स्वरूपफलविशेषा यथाप्रश्नं परब्रह्मस्वरूपविशेषप्रश्ने ७ प
तश्चैतच्चराचरमिति निमित्तोपादानयोः पृष्टत्वात् यन्मयमिति यत्त्वेनेत्यस्थितिलयकर्मभूतं जगत्कि
मात्मकमिति पृष्टं तस्य चान्तरात्मा च सर्वति अहं चेतावन्मात्रं मनसाऽपि हृदयेनान्तःयाप्यादिकृतं तत्क्या
पव्याप्यकर्थोर्वसत्ते कारणं यन्मयमिति प्रश्नस्योत्तरत्वात् जगच्च सर्वति सामानाधिकरण्यस्य तन्मय
त्वमितिपञ्चदशविकारार्थः शृङ्गरकल्पवत्सर्वत्र न्याय्यत्वात् तद्विवृत्तमयादिवत् स्वार्थिकः जगच्च सर्वममुत
त्वादुपपत्तेः [illegible] त्रयाणामेव तत्र निर्धारितमिति तत्तत्कृतवचनेन मयपूर्वमिति मयट्

श्रीभा· तेनासतोऽदृष्टत्वादिति यो यं ज्ञाने नीलाद्यर्थकार उपलभ्यते स विनष्टस्यासतोऽर्थस्याकारोऽभिव्यक्तं नार्हतीति कुतः अदृ
३८ ष्टत्वात् न खलु तत्पूर्वं चित्तविनष्टेन तद्धर्मस्यार्थान्तरे संक्रमः तोऽदृष्टं प्रतिबिम्बादिकमपि स्थिरस्यैव संभवति तत्रापि न
धर्ममात्रस्य तोऽर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमर्थस्य ज्ञानकालेऽवस्थानादेव भवति पुनरपि साधारणाद्दूषणा
मादृश्री उदासीनानामपि देवसिद्धिः श्रीएवं ज्ञाणिकत्वासदुत्पन्नहेतुकं विनाप्यर्थं प्रयोगमे उदासीनाना ९४
मनुमुञ्जानामपि सर्वार्थसिद्धिस्यादिष्टप्राप्तिरनिष्टनिवृत्तिर्वा प्रयत्नादिभिः साध्यते तत्कार्यं क्षेत्रे हि सर्वेषां
ध्वंद् भावानां पूर्वं न खलु नष्टो वा विशेषः संस्कारादिको विद्यादिर्वा तत्र न कश्चिदनुवर्त्तते इति प्रयत्नादिसाध्यं
न किंचिदस्ति एवं सत्यहेतुसाध्यत्वात् सर्वसिद्धीनां उदासीनानामपि मुष्मिकं फलं मोक्षस्य सिद्धेः श्री ति७
36 नाभावउपलब्धेः श्रीविज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते यदुक्तमर्थवैचित्र्यकृतं ज्ञानवैचि
नाप त्र्यमिति तन्नोपपद्यते अर्थवत् ज्ञानानामेव साकाराणां स्वयमेव वैचित्र्यत्वात् तच्च रूपवैचित्र्यं वासनावशादेवोपप त्रिप
द्यते वासना च विलक्षणा प्रत्ययप्रवाहरूपवय हूरकारं ज्ञानं कपालाकारज्ञानस्योत्पादकं तत्पूर्वं घटज्ञानं त कोष
स्य च तथाविधस्योत्पादकं तत्पूर्वं घटज्ञानमित्येवंरूपः प्रवाहरूपवासनेत्युच्यते कथं वहिष्टं वर्षमहीधराका सरादि
रस्यं तरस्य ज्ञानस्यैवेत्युच्यते इत्यर्थस्यापि च्य बहारयोग्यत्वं ज्ञानप्रकाशापन्नमन्यथास्वपरवेद्ययोर नति
प्राय प्रसंगात् प्रकाशमानस्य ज्ञानस्य साकारत्वमेव प्राप्यस्य प्राणीयं निराकारस्य प्रकाशायोगात् एक स्याप ३८
ना ... तथाविधस्योत्पादकं

नैः परिचायितस्यार्थसाधारणस्यापि तत्कल्पना प्रतिसिध्यते आकाशो च निरूपाख्यतान पुत्ताभावरूपत्वेनाभ्युपगत
पृथिव्यादिवदाकाशस्याप्यबाधितप्रतीतिसिद्धत्वाविशेषात् प्रतीयते ह्याकाशः अन्तरेण । पतत्यत्र शरध इति
ज्ञानादिपतनदेशत्वेन न च पृथिव्याद्यभावमात्रमाकाश इति वक्तुं शक्यं विकल्पासहत्वात् पृथिव्यादेः प्रागभा
वः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावो वाकाशः सर्वदाप्याकाशप्रतीत्यनुपपत्तेः स्यात् प्रागभावप्रध्वं।
साभावयोराकाशत्वे पृथिव्यादिपूर्वं नाशे चाकाशप्रतीत्यापत्तेः निराकाशं जगत्स्यादितरेतराभावस्याका
शत्वे चेतरेतराभावस्यानन्तत्वात् तत्तत्त्वेन तत्तदाकाशान्तराकाशप्रतीतिर्न स्यात् अत्यन्ताभावस्य पृथिव्यादीनां न सं भार्द
भवति अभावस्याविद्यमानपदार्थवस्यादिशेषत्वोपपादनाच्चाकाशस्याभावरूपत्वेऽपि न निरूपाख्यत्वसं
भवतीति नभसः काशस्य सिद्धेः तरणापदेशप्रदर्शितपंचीकरणेन रूपवत्ताच्चाक्षुषत्वेऽप्यविरोधः श्री अनु
स्मृतेरप्यपि एवं प्रत्यक्षेन वस्तुनः स्थिरत्वमेवोपपद्यते अनन्तरक्षणहृष्टीनुभूतवस्तुविषयं ज्ञानं प्रत्यभिज्ञान
मित्यर्थः तदेवेदमिति सर्वं वस्तुजातमतीतकालानुभूतं प्रत्यभिज्ञायते न च भवद्भिर्ज्वालादिवत्सादृश्यनि
बंधनोपपन्नैकत्वव्यामोह इति वक्तुं शक्यं व्याप्यस्तोज्ञातुरेकस्यानभ्युपगमात् न हि तौरेवज्ञानविषयत्वाभ्यु
पगमात् ज्ञाने साकारं समर्थयितुं शोभ्यौ ज्ञानगतेन नीलाद्याकारेणानुमीयते न च स्व एव ज्ञाने नोन्नत्वा
न्तरज्ञानाकारसिद्धिः नीलज्ञानत्वं ज्ञाने पीतज्ञानात् ... ज्ञानेदि ... मित्यर्थोच्य

श्री
भा०
३०

पैकांशेनात्मनेतिरिकतसंभवति तथाचश्रुतिः द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते तयोरन्यःपिप्पलं
स्वाद्वत्त्यनश्नन्नन्योभिचाकशीतीति ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे छायातपौब्रह्मविदोवदंति पं
चाग्नयोयेचत्रिणाचिकेताः अंतःप्रविष्टःशास्ताजनानांसर्वात्मेत्याद्याः अस्मिन्नपिदृष्टांतेच स सर्वभूतप्रकृतिंविका
रान्गुणादिदोषांश्चमुनेऽत्यतीतः अतीतसर्वावरणोऽखिलात्मातेनास्तृतंयद्भुवनांतराले समस्तकल्याणगुणात्म
ला५ कोसौपरः परापराणांसकलानयत्र क्लेशादयः संतिपरावरेशे अविद्याकर्मसंज्ञान्यातृतीयाशक्तिरिष्यते ययातैवत्र
शक्तिःसावेष्टितानृपसर्वगेति भेदव्यपदेशात् उभयेपिहिभेदेनैनमधीयते भेदव्यपदेशाच्चान्यः अधिकं
तुभेदनिर्देशात् अश्मादिवच्चतदनुपपत्तिः य आत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरीरंय आत्मानमंत
रोयमयति प्राज्ञेनात्मनासंपरिष्वक्तः प्राज्ञेनात्मनान्वारूढइत्यादिभिश्चयोरन्योन्यप्रत्यनीकाकारेणस्वरूप
निरूपणात् नापिसाधनानुष्ठानेननिर्मुक्ताविद्यस्यपरेणस्वरूपैक्यसंभवः अविद्याश्रयत्वयोग्यस्यतदन
र्हत्वासंभवात् यथोक्तं परमात्मात्मनोर्योगः परमार्थइतीष्यते मिथ्यैतदन्यद्द्रव्यंहि नैतितद्द्रव्यतां ३२
यतः इति मुक्तस्यतत्तद्धर्मतापत्तिरेवेतिभगवद्गीतासूक्तं इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः
सर्गेपिनोपजायंतेप्रलयेनव्यथंतिचेति इहापि आत्मभावंनयत्येनंतद्ब्रह्मध्यायिनंमुने विकार्यमात्म

अनुरक्षाय मत्वदः तद्वादनानि
आदव्यादिनोवाप्यस्य ज्ञाततोयरमात्मन

र्थः एतदुक्तं भवति यदिमा घनिविक्तः कोप्यात्मा मदाकारम् न ज्ञानैकाकारो न्याकारोस्ति तदाहमेवमाकार आ
यं वान्याद्याकार इति शाक्याने य्यपदेष्टु नचैवमत्रिमवैणां ज्ञानैकाकारत्वेन समानत्वादेवेति वेतास्य विभेदे
नेतीन ज्ञाप्याकारत्वे व प्रयमा तनेनानत्वरूप कत्त अपितु देवादि पितुप्रवेशकृत मित्सुपादि श्रयते नात्मैक्य दृष्टान्ते
चानेकरम्य वर्तिनां वायो श्वासानां स्वरूपैक्यं अपिलाकारसाम्यमेवतेषां वायुत्वेनैकाकारताणां रेभ भेदानि क्रम
त्वात्त तो हि घटज्यादितत्त्वा भेद एवमात्मनो देवादितत्त्वाभेदस्तेन साम्यमपि विवक्षितं वाशब्दात्तानां पदार्थानां तत्त
द्रूपेणैक्यमेव न स्वस्वरूपैक्यं तथा वायवीयानामश्वासानामपि स्वरूपभेदो वक्तव्यः। श्वासस्य चत्वमिति सर्वात्म
नां स्त्रीलिङ्ग ज्ञानाकारैकत्वेन परानन्दं तत्समानाधिकरण्यनाहं तथा मिथ्यादीनामथ्यानां ज्ञानमेवाकारस्तत्स्व
रूपत्वं देवाद्याकारभेदेनात्मनां भेद मोहयति तेनाह अन्यथा देहात्मा तिरिक्ता उपदेश्यस्वरूपेस्मि सर्वमेतदा
त्मस्वरूपमिति भेद निर्देशो न घटते अहं त्वमादि शब्दानां सम्यक्त्वेण सर्वमेतदात्मस्वरूपमित्यनेन समानाधिक
रण्यं तु घलक्षणं त्वमपि न संगच्छते सोपि विपर्योपदेशमकरोदित्याह तत्त्या ज्ञानभेदं परमार्थदृष्टिरिति कृतस्त्रैव नि
र्णयार्ति वेत देहात्मविवेक विषयत्वादुपदेशस्य तच्चापिंडः पृथक्पृथक्जत्वसः शिरः पाण्यादि लक्षणस्तेति प्रक्रमात
विभेदजनक ज्ञान इति चात्मस्वरूपैक्यपरं नापि जीवपरयोरात्मस्वरूपैक्यज्ञाननिषेधं जीवपरयोस्पित्वरू

विभेदजनकज्ञानेनात्मस्वरूपैक्यं निषेधं पते
आत्मनोयद्गतो भेदमस्तु तेकः

श्री·
भा·३८

रैकार्थ्यात् प्राकृतनामरूपाभ्यां विनिर्मुक्तस्य निरस्तनानात्वभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारेण ध्याने प्रका-
रैक्यं तत्त्वव्यवहारोऽस्त्येव यथासौ यगो विविति अत्रापि विज्ञानं शरीरकं प्राप्य पर्यवसानतः पार्थिवं प्राप्त्य-
पन्नस्यैवात्मनः प्रक्षीणाशेषभावनस्य इति परब्रह्मध्यानादात्मा परब्रह्मवत् प्रक्षीणाशेषभावनः कर्मभावना
ब्रह्मभावनोभयभावनेति भावनात्रयरहितः प्राणिनां यस्तमभिप्रायं तेनोक्तः करणीज्ञानं करणं तु स एवेति
ज निष्पाद्यमन्तिकार्थं वैकृतकृत्यो निवर्त्तयेदिति कर्मणोऽस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभाव-
नात्मस्वरूपप्राप्त्या कृतकृत्यत्वेन निवृत्तिवचनात् यावदित्यत्र तु तेऽपि परिमुक्ताः तद्भावभावमापन्नस्तदा
सौ परमात्मना भवत्यभेदी भेदश्चास्याज्ञानकृतो भवेदिति मुक्तस्वस्वरूपमाह तद्भावो ब्रह्मणो भावः स्व-
भावः तत्स्वरूपैक्यं तद्भावभावमापन्न इति द्वितीयभावशब्दार्थस्तन्मयान्तर्भावोऽपि कार्थविरोधात् यद्ब्रह्मणः प्रक्षी-
णाशेषभावनत्वेन तदापत्तिः तद्भावभावापत्तिः यदेवमापन्नः तदायं परमात्मनोऽभेदी भवति भेदरहितो
भवति ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः तत्त्वयोस्य कर्मरूपाज्ञा- ३८
नमूलः तत्स्वरूपकृतः स तद्देवादिभेदः परब्रह्मध्यानेन तन्मूलभूताज्ञानरूपकर्मणि विनष्टे हेत्वभावा-
न्निवर्त्तत इत्यभेदी भवति यथोक्तं एकस्वरूपभेदस्तद्वाह्यकर्मप्रवृत्तिजः देवादिभेदे विध्वस्ते नास्त्यवा-

38

नः शब्दात्तो ऽस्माकं सोको यस्येति आत्मभावमात्मनः स्वभावेन स्वार्थक स्वरूपाय निराकुत्वमात्मस्य वर्तते
च ज गद्यायापरवर्जो ऽसकृत्याद सन्निति तत्वात् भोगमात्रसाध्यलिंगाच्च मुक्तो यस्यवा यदेशाच्चेति श्रुतिर
पि ममतायापरवर्जोऽसन्नानात्मालियेति इति श्रभाष्यकारस्य देवतासायुज्यादशरीरत्वादिदेवतावत्तर्वा यं
सिद्धिः स्यादित्याह कृतकृत्य पदे हात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामानि तेषां सर्वेषु लोकेषु कामचा
रो भवति ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति एतमानंदमयमात्मानमुप
संक्रम्य इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन् एतत्साम गायन्नास्ते [illegible] रसं ह्येवायं लब्ध्वानंदी भवति यथा
नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं
यथा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्यादि [illegible] पर्वविद्यास्त [illegible] सर्वोत्सर्गत्वमेव परत्र
[illegible] एकत्वमेव [illegible] विद्याविकल्प इति [illegible] प्रधानस्य विकल्पाविशिष्ट
३ आदिल्लत्वादिसूत्रं [illegible] विद्याविकल्प [illegible] भुक्तेन कुत्रापि [illegible] विनिभाष्य
कृता व्याख्यानेन [illegible] ब्रह्मवेद ब्रह्मैव भवतीत्यत्रापि नामरूपाद्विमुक्तः परात्परं पुरु
षमुपैति दिव्यं [illegible] निरंजनः परमं साम्यमुपैति परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्यादि

श्री॰ भा॰ ३९ दीश्वरासांस्वरूपभेदनिषेधः यदप्युक्तं निर्विशेषस्वयंप्रकाशैकवस्तुनि दोषपरिकल्पितमीश्वरेशितव्याद्यनं
न्तविकल्परूपं सर्वं जगत् तद्दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या सा च
वाक्याभ्युपगमनीया अन्न तेन हि ब्रह्मदाश इत्यादिभिः श्रुतिभिः प्रमाणैः तत्त्वमस्यादिवाक्यसामानाधिकर
ण्यावगतजीवैक्यान्यथानुपपत्त्या च सा न सती भ्रान्तिबाधयोरयोगात् नाप्यसती ख्यातिबाधयोरप्ययो
गात् अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तद्विद इति तदयुक्तं सा हि किमाश्रित्य भ्रमं जनयतीति व
क्तव्यं न तावज्जीवमाश्रित्य अविद्यापरिकल्पितत्वाज्जीवभावस्य नापि ब्रह्माश्रित्य तस्य स्वयंप्रकाश
39 ज्ञानरूपत्वेनाविद्याविरोधित्वात् सा हि ज्ञानबाध्याभिमता ज्ञानरूपं परं ब्रह्म यदि तद्विवर्तमस्य जगतः कथं ज्ञा
नेन तिरस्क्रियेत कः प्रसंगः तन्निवर्तने ज्ञानं ब्रह्मेति चेद्ज्ञानमज्ञानस्य निवर्तकं ज्ञानं ब्रह्मेति विज्ञानमस्तीति चे
स्वप्रमेयतादृस्यां [illegible] ब्रह्मणोऽनन्यभूतत्वे स्वयमप्रकाश्यत्वे ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्याश्च विद्याया बाधकं न
स्वरूपभूतं ज्ञानमिति चेत् तद्ब्रह्मणोऽविद्यास्वरूपप्रकाशत्वाविशिष्टत्वादेकस्याविरोधित्वमन्यतरस्य ने
तिविशेषाभावात् यदनुक्तं भवति ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मस्वरूपं अयः स्वभावो वा व्यक्तं सः ब्र
ह्मणः स्वयंप्रकाशत्वेन स्वरूपमेव प्रकाशते अतस्तद्विरोधित्वेन कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति ३९

ब्रह्मवत्तत्प्रकाशत्वात्तदपि न निवर्तकं ५४

वावरणो हि स इति एवं चेद्विभुरात्मेति विभेदजनकेऽज्ञानेनात्मात्यंतिके गते आत्मनो ब्रह्मणो भेदमसंतं
कः करिष्यतीति विविधो भेदो विभेदः देवतिर्यङ्मनुष्यस्थावरात्मकः यथाकाशोऽनेकेनापि घटविभो
विभेदो यस्मिन्ज्ञाने तन्निबंधनः इति आत्मनि ज्ञानस्वरूपे देवादिरूपविविधभेदहेतुभूतकर्मात्मकमज्ञानं
एव सत्यज्ञानेनात्यंतिकनाशं गते सति हेत्वभावादनंतरं परस्माद्ब्रह्मणः आत्मनो देवादिरूपं भेदं कः करि
ष्यतीत्यर्थः अविद्याकर्मसंज्ञान्या [illegible] इत्यादिना तदात्मा हि रूपेण सर्वस्यात्म
तयैव विधानं अथवा नरः सर्वाणि भूतानि [illegible] उत्तमपुरुषस्त्वन्यः इत्यादिभिर्विरोधः
अंतर्यामिरूपेण सर्वात्मात्मत्वं [illegible] ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति सर्वस्य
चाहं हृदि संनिविष्ट इति च अहमात्मा गुडाकेश सर्वभूताशयस्थित इति च तदेवाह भूतशब्दोऽप्यात्मप
र्यंतवचनः एवं सर्वेषामप्यात्मा ततः सर्वेषां [illegible] ननु [illegible] वि
नाऽपत्याद्दिति भगवद्विभूत्युपसंहारप्रायमिति तथैवाभ्युपगंतव्यं [illegible] भूतिमत्त्वं
श्रीमदूर्जितमेव वा तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि
ति अतः प्राकृतवचनं निर्विशेषवस्तुप्रतिपादकमपि नायं [illegible] प्रतिपादनेनापि चिद्वि

श्री॰ नेनाप्रकाशोत्पत्तिप्रतिबन्धोविद्यमानस्य विनाशो वा प्रकाशस्यानन्यायत्ताभ्युपगमेन प्रकाशतिरो
भा॰ धानेप्रकाशानाद्यः एवं अविद्यानिर्विषयानिराश्रयान्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनेनाश्र
४॰ यमनन्तविषयमात्मानमनुभवतीत्यविद्याश्रयत्वाश्रयदोषः परमार्थभूतः उतापरमार्थभूत इति विवे
चनीयं नतावत्परमार्थः अनभ्युपगमात् नाप्यपरमार्थः तथा सति द्रष्टृत्वेन वा दृश्यत्वेन वा दृशित्वे
नवाभ्युपगमनीयः नतावद्दृशिः दृशिस्वरूपभेदानभ्युपगमात् धर्माधिष्ठानभूतायास्तस्याद्रष्ट
त्. दृशेर्धार्म्मिकपदार्थप्रसङ्गो नापारमार्थ्यानभ्युपगमात् द्रष्टृदृश्ययोस्तद्वद्विन्नायाः दृशोऽप्रकाश
त्वनिवृत्त्वेन मूलदोषान्तरापेक्षायामनवस्था स्यात् अथैतन्माभूदिति निर्दोषपारमार्थिकसत्यानुभूतिरेवाश्र
स्वरूपो दोष इति चेत् अस्यैव चेत् दोषः प्रपञ्चदर्शनस्यैवतत्त्वं स्यात् किं प्रपञ्चवस्त्वाविद्यान्तरक
ल्पनेन अस्यतो दोषत्वे सति तस्य नित्यत्वेनानिर्मोक्षप्रसङ्गः स्यात् अतो वा वस्तुव्यतिरिक्तपारमार्थि
एव सर्वज्ञः सर्वशक्तिः पुरुषोत्तमः सच्छब्दाभिधेयः तथा च सर्वेष्वपि सृष्टिप्रकरणेष्वीक्षापूर्विके
व सृष्टिः प्रतीयते स ऐक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजत स ईक्षाञ्चक्रे स प्राणमसृ
जतेत्यादिषु ननु एककार्यानुगुणेनैककारणेन भवितव्यं सत्यं सर्वकार्यानुगुण एव सर्वज्ञः सर्वश
क्तिः सत्यसंकल्पः पुरुषोत्तमः सूक्ष्मचिदचिद्वस्तुशरीरकः परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः यस्याव्यक्तं शरीरं यस्याक्षरं ९५
शरीरं यस्य मृत्युः शरीरं एष सर्वभूतान्तरात्माऽपहतपाप्मेत्यादि तदेतन्न विलक्षणत्वादित्याद्युपप्रति

78

ऽनेकार्थः पुरुषार्थोपयोगि भवति बालोन्मत्तादीनाम् अप्यर्थसद्भावश्रवणेऽपि बहुधीयुक्तिः तेषामेव नरस्मिन्नपि
ज्ञाने विद्यमाने ग्रहणाभावनिश्चयो न्यायेन तस्य दानीमेव बहुधा दयोनिवर्तेरन् अथोपनिषदेष्वपि वाक्येषु ब्र
ह्मणि सन्नाम्पर्वाभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात् अतो यतो वा इमानीत्यादि वा
क्यैर्निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सर्वज्ञं सत्यसंकल्पत्वाद्यनन्तकल्याणगुणाकरमनव
धिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धं ॥ श्री ईक्षतेर्नाशब्दम् [illegible] श्री यतो वा इमानीत्यादिजगत्कारण
वादिवाक्यप्रतिपाद्यं सर्वज्ञं सर्वशक्ति सत्यसंकल्पत्वाद्यनन्तकल्याणगुणाकरं ब्रह्म निजास्वभिमुक्ते इदा
नीं जगत्कारणवादिवाक्यानामानुमानिकप्रधानादिप्रतिपादकत्वं नेह निरस्यते ईक्षतेर्नाशब्दमित्यादिना
छान्दोग्ये सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृज
तेत्यादि तत्सदिष्टम् किं सच्छब्दवाच्यं जगत्कारणं परे [illegible] सामानिकं प्रधानमुत [illegible] मिति किं प्रा ता५
प्रधानमिति उक्तं सदेव सोम्येदमग्र आसीदेकमेवेति सच्छब्दवाच्यस्याचेतनभोग्यभूतस्य सत्वरजस्त
मसां स्पृष्टपदादिनानारूपविकारावस्थस्य वस्तुनः कारणावस्थां वदति कारणभूतद्रव्यस्यावस्थान्तरापत्ति
रेव हि कार्यता अतो यत्र द्रव्यस्य यत्स्वभावं च कार्यं वस्तु तत्स्वभावं तदेव द्रव्यं कारणावस्थं सत्त्वरजस्तमोमय
च कार्यमिति [illegible] मिति सदेव सोम्ये

भा०श्री
८०

चेति न तेजःप्रभृतीनामात्मत्वं तेनापि मुख्य एव श्वेतकेतोः अतः साहचर्यादपि न देहादेस्तत्त्वमत्र
गौणत्वाशंका ह्यतो न्यासिनेति सूत्राभिप्रायः। तस्मान्न प्रधानं सच्छब्दप्रतिपाद्यं ॥ श्री ॥ तन्निष्ठस्य
मोक्षोपदेशात् ॥ श्री ॥ सूत्रम् श्वेतकेतोस्तत्त्वमसीति सदात्मकत्वानुसंधानमुपदिश्य तन्नि-
ष्ठस्य तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति शरीरपातमात्रान्तरायो ब्रह्मसंपत्ति ८४
लक्षणो मोक्षस्तमुपदिशति। यदि च प्रधानमचेतनं कारणमुपदिश्येत तदा तदात्मकत्वान्न
प्रधानस्य मोक्षसाधनत्वोपदेशो नोपपद्येत। यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य
भवतीति तन्निष्ठस्याचेतनसंपत्तिरेव स्यात्। न च मातापितृसहस्रेभ्योपि वत्सलतरं शास्त्रमे-
वंविधमनर्थमावहति। इति हेतुमतामचिन्त्यपतिमुपदिशति प्रधानकारणवादिनोपि हि प्रधा-
नेति निष्ठस्य मोक्षो नाभ्युपगम्यते इति। तस्मान्न प्रधानं ॥ श्री ॥ हेयत्वावचनाच्च ॥ श्री ॥ यदि हि प्रधानमेव का-
रणं सच्छब्दाभिहितं मन्येत तदा श्वेतकेतोस्तदात्मकत्वमात्मविरोधित्वाद्धेयत्वेनोपदेश्यं
स्यात्। न चैतत्क्रियते प्रत्युत तदुपरि पठितेनैव तत्त्वमसि तस्य तावदेव चिरमित्युपदिश्यते। तस्मान्न प्रधानं राम
श्री प्रतिज्ञाविरोधात् ॥ श्री ॥ प्रधानकारणत्वे प्रतिज्ञाविरोधश्च भवति। वाक्योपक्रमे हि एकविज्ञानेन ८२
सर्वविज्ञानं प्रतिज्ञातं न त्वकार्यकारणयोरनन्यत्वेन कारणात्मकत्वं हि ज्ञानाज्ञानात्कार्यमतसचेतन

79

पादयिष्यते अंशस्तिवाक्यानि न प्रधानप्रतिपादनयोग्यानीत्युच्यते वक्ष्यति दोषस्तत्रैव परिहरिष्यते
मानिका दृष्टान्तयोगादनुमानरूपमेवेदं वाक्यमिति तदसत् हेत्वन्तरादानात् येनाश्रुतं श्रुतमि
त्येकविज्ञानेन सर्वविज्ञाने प्रतिपिपादयिषिते सर्वात्मनानुपसंभवस्तत्वानस्यात्तेन भवत्सा प्रदर्श
नार्थं हि दृष्टान्तोपादानं इत्यादि वचनादेव ज्ञानमात्रं तथाभ्युपगमात् अथाप्यचेतनमात्मं
त्वामीक्षणमिहोच्यते आरम्भप्रधानगतं गौणमीक्षणं तत्तेज ऐक्षत तदाप ऐक्षन्तेति गौणेक्षण
साहचर्याद्भवति चाचेतनेऽपि चेतनधर्मोपचारः यथा कृषिप्रतीत्या प्रपात्यत्यः वर्षेणा बीजं प्रति
संजहर्षेति अतो गौणमीक्षणमित्याशङ्क्याकाशमनुभाष्य परिहरति ॥ गौणश्चेन्नात्मशब्दा
त् ॥ ६ ॥ यदुक्तं गौणेक्षणसाहचर्यात्तत्रापीक्षणस्य [illegible] सर्वनियन्तृत्वं वक्ष्याभिप्रायगोचर
इति तत्र ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेति स एव प्रतिपाद्य न स्यात्तत्र गौणत्वव्यपदेशात्
एतदुक्तं भवति ऐतदात्म्यमिदं सर्वं स आत्मेति चेतनात्मा व्यपदेश्यो ह्येतस्मादात्मेत्यात्म
त्वाद्यदर्शनाच्चेतने प्रधाने संगच्छते इति अतस्तेजोऽबन्नानामपि परमात्मैव आत्मेति तेजःप्र
भृतयोऽपि शब्दाः परमात्मन एवाभिधायकाः यथा हि तदिमास्तिस्रो देवता अनेन जीवेनात्मना
नुप्रविश्य नाम [illegible] वचनं तत्र नामभागे

श्री· भा· ८८

हंतेयथानद्यःस्यन्दमानाह्रोवाथिंदोवाद्कोवावावाद्दोवादंपोवामथाकोवायथऽङ्वेतिनयातथाभवंनीतिच

तथास्यथुमंतीवंप्राज्ञेनात्मनासंपरिष्वक्तइतिचवदति तस्मात्सकृत्स्नाद्व्यः परंब्रह्मसर्वज्ञः पर

मेश्वरः प्रकृष्टोनमएवतदाद्दतिकारः सतासोम्यतदासंपन्नोभवतीतिसंपत्स्यसंपत्तिर्भ्याशेतदथ

प्रलीयते प्राज्ञेनात्मनासंपरिष्वक्तइतिचाक्रेति इत्यस्मिनप्रधाने श्री गतिसामान्यात् श्री आत्मा

वाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत् सईक्षतलोकान्नुसृजाइति सइमाँल्लोकानसृजत तस्मा

द्वाएतस्मादात्मनआकाशस्संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवीतस्यहवा ६

एतस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदइत्यादिसृष्टिवाक्यानांयागतिः प्रकृतिस्तत्सामान्यात

त्समानार्थत्वादस्य तेषुसर्वेषुसर्वेश्वरःकारणमवगम्यते तस्माद्ब्रह्मापिसर्वेश्वरः कारणमितिति

प्रतीयते इत्यस्मिनप्रधाने श्री श्रुतत्वाच्च श्री श्रुतमेवसाक्षात्सूपनिषदि अस्यसर्वज्ञत्वाच्चस्यात्म

नेननामरूपव्याकर्तृत्वंसर्वज्ञत्वंसर्वशक्तित्वंसर्वाधारत्वमपहतपाप्मत्वादिकंसत्यकामत्वसत्य

[illegible]त्वंचानेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणि सन्मूलाः सोम्येमाः प्रजाः स

दायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्माअयच्चास्येहास्तियच्चनास्तिसर्वंतदस्मिन्स ने२ २२

माहितंतस्मिन्कामाः समाहिताः एषआत्मापहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोपिपा

80

प्रपंचस्य कात्स्न्येनैवोपपादनीयं न तु प्रधानकारणके चेतनवर्गस्य प्रधानकार्यत्वाभावात् प्रधानविज्ञा
नेन चेतनवर्गविज्ञानासिद्धेर्विरुध्येते इतश्च न प्रधानं यो न प्रधानं यो न येन सच्छब्दवाच्यमुक्त्वा
हस्वप्नांतं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो
भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीति अस्मिन्प्रकरणे जीवं सता संपन्नं स्वमपीतं स्वस्मिन्
प्रलीन इति व्यपदिशति प्रलयश्च स्वकारणे लयः न चाचेतनं प्रधानं चेतनस्य जीवस्य कारणं भवति
स्वमपीतो भवति आत्मानमेव जीवोऽपीतो भवतीत्यर्थः चिदचिद्वस्तुशरीरकं तदात्मभूतं ब्रह्म जी
वशब्देनाभिधीयत इति नामरूपव्याकरणश्रुत्यां तेन जीवशब्दाभिधेयं ब्रह्म सुषुप्तिकाले विषय
यकालस्वनामरूपपरिष्वंगाभावात्केवलसच्छब्दाभिधेयमिति सता सोम्य तदा संपन्नो भवति स्वमपी
तो भवतीत्युच्यते तथा समानप्रकरणे नामरूपविभागपरिष्वंगाभावेन प्राज्ञेन वदति प्राज्ञेना
त्मना परिष्वक्तो न बाह्यं किंचन वेद नान्तरमित्युच्यते आत्मान्तर्जीवस्य नामरूपपरिष्वंगादेव हि स्वस्मु
तिरिक्तविषयज्ञानोदयः सुषुप्तिकाले नामरूपे विहाय सता संपरिष्वक्तः पुनरपि जाग्रद्दशायां
नामरूपे परिष्वज्य तत्तन्नामरूपो भवतीति इतिश्रुत्यन्तरेष्वभिधीयते यथाह स प्रज्ञः स्वप्ने न कंच
न पश्यति अथास्मिन्प्राण एवैकधा भवति तथा ह्यत्र स्वपितीत्यन्तं प्राज्ञः पथाय तं नीवशानि

श्री० भा० ८२

यद्रूपत्वाभावात् घटादिवदचित्त्वमेव तद्रूपयद्रूपत्वाभावेऽपि तत्तद्धर्मवत्त्वमस्तीति चेन्न तत्तद्धर्मवत्त्वे हि
तत्सामर्थ्यमेव सामर्थ्यगुणयोगे हि निर्विशेषवादः परित्यक्तः स्यात् अथ प्रकृतिप्रामाण्यादयमे
कोऽविशेषोऽभ्युपगम्यत इति चेत् हन्त तर्हि तत एव सर्वज्ञता सर्वशक्तित्वं सर्वेश्वरत्वं सर्वकल्याणगुणाक
रत्वं सकलहेयप्रत्यनीकत्वेत्यादयः सर्वेऽभ्युपगन्तव्याः शक्तिमत्वं च कार्यविशेषावगमात् तच्च का
र्यविशेषैकनिरूपणीयं कार्यविशेषस्य निष्प्रमाणकत्वेन तदेकनिरूपणीयशक्तिमत्वमपि निष्प्र
माणकं स्यात् किं च निर्विशेषवस्तुवादिनो वस्तुन्यपि निष्प्रमाणके प्रत्यक्षानुमानागम[illegible]ज
स्वानुभवाः सविशेषविषया इति पूर्वमेवोक्तम् तस्माद्विचित्रचेतनाचेतनात्मकजगद्रूपेणावस्थास्यामीति
लक्षणः पुरुषोत्तम एव जिज्ञास्यं ब्रह्मेति सिद्धम् एवं जिज्ञासितस्य ब्रह्मणश्चेतनभोग्यभूतजडरूपस
त्वरजस्तमोमयप्रधानाद्यावृत्तिरुक्ता इदानीं कर्मवश्यात् त्रिगुणात्मकप्रकृतिसंसर्गनिमित्तनानावि
धानन्तदुःखसागरनिमग्नत्वेनाशुद्धाच्छुद्धाशुद्धप्रत्यगात्मनोऽन्यदखिलहेयप्रत्यनीकं निरतिशयानं
दं ब्रह्मेति प्रतिपाद्यते ॥ आनन्दमयोऽभ्यासात् ॥ तैत्तिरीयकेऽधीयते स वा एष पुरुषोऽन्नरसमयः
इति प्रकृत्य तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय इति तत्र सन्देहः किमयमानन्दमयो बं
धमोक्षभागिनः प्रत्यगात्मनो जीवशब्दाभिलपनीयादन्यः परमात्मा उत स एवेति किं युक्तं प्रत्यगात्म ८२

सः सत्यकामः सत्यसंकल्प इति । न चास्य कश्चिज्जनिता न चाधिपः न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च
तस्य लिङ्गं स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः सर्वाणि रूपाणि विचित्य धी
रः नामानि कृत्वाभिवदन् यदास्ते अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा विष्णुरात्मा परायणं पतिं विश्व
स्यात्मेश्वरं यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः
एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः [illegible] इत्यादीनि तस्माज्ज
गत्कारणत्वादिवाचनं प्रधानप्रतिपादनयोग्यं अतः सर्वज्ञः सर्वशक्तिः सर्वेश्वरो निरस्तसमस्त
हेयगन्धोऽनवधिकातिशयासंख्येयकल्याणगुणगणमहार्णवः पुरुषोत्तमो नारायण एव निखिल
जगदेककारणं जिज्ञास्यं ब्रह्मेति स्थितम् अत एव निर्विशेषचिन्मात्रब्रह्मवादोऽपि सूत्रकारेणाभिः
श्रुतिभिर्निरस्तो वेदितव्यः पारमार्थिकमुख्येक्षणादिगुणयोगिनो जिज्ञास्यब्रह्मत्वस्थापनात् निर्वि
शेषवादे हि साक्षित्वमप्यपारमार्थिकं वेदान्तवेद्यं ब्रह्म जिज्ञास्यतया प्रतिज्ञातं तच्चेतनमिती
क्षतेर्नाशब्दमित्यादिभिः सूत्रैः प्रतिपादितं चेतनत्वं नाम चैतन्यगुणयोगः अत ईक्षणविरहिणः
प्रधानतुल्यत्वमेव किं च निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादं प्रकाशो
हि नाम स्वस्य च परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः निर्विशेषस्य वस्तुनः न ह्युभ

गात्मपरं परां परां समाप्यति अतो जीवात्मस्वरूपमेव ब्रह्मविदाप्नोतीति प्रक्रांतं ब्रह्मनदेवानंदमयस्तु यदिष्टमि
ति निश्चीयते नन्वत्र ब्रह्मपुच्छं प्रतिष्ठेत्यानंदमयादन्यद्ब्रह्मेति प्रतीयते नैवं पुच्छत्वस्य स्वभावविशेषेण पुच्छम ८३
विपक्षस्यैव शिरः पक्षपुच्छरूपेणावयवदिष्यते यथान्नमयो देहएव स्वस्मादतिरिक्तैः स्वावयवैरेवन स्वमेव
शिर इत्यादिना शिरः पक्षपुच्छवत्तया निदर्शितः तथानंदमयब्रह्मापि स्वस्मादनतिरिक्तैः प्रियादिभिर्दर्शि
तं तत्रावयवत्वेन रूपितानां प्रियमोदप्रमोदानंदानामाश्रयत्वात् यः स्वात्मानंदमयं ब्रह्मपुच्छं प्रतिष्ठेत्युच्य
ते यदि चानंदमयादन्यद्ब्रह्माभविष्यत् तस्माद्वा एतस्मादानंदमयादन्योऽन्तर आत्मा ब्रह्मेत्यपि निरदेक्ष्यत
न चैवं निर्दिश्यते एतद्ब्रह्मभवति ब्रह्मविदाप्नोति परमिति प्रक्रांतं ब्रह्म सत्यं ज्ञानमनंतं ब्रह्मेति लक्षण
तः सकलेतरव्यावृत्ताकारं प्रतिपाद्य तदेव तस्माद्वा एतस्मादात्मनइत्यात्मशब्देन निर्दिश्य तस्य सर्वा
तरात्मत्वेनात्मत्वं व्यंजयद्वावयमन्नमयादिष्वंतरंतरत्वात्मशब्देन निर्दिष्टान् प्राणमयादीन्व्यतिक्र
म्यानंदमयोऽन्तर आत्मानंदमय इत्यात्मशब्देन निर्दिश्यानंदमये पर्यवसाययति अत आत्मशब्देन प्रक्रांतब्रह्मानंदम ८३
य इति निश्चीयते इति ननु च ब्रह्मपुच्छं प्रतिष्ठेत्युक्त्वा असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मे
ति चेद्वेद संतमेनं ततो विदुरिति ब्रह्मज्ञानाज्ञानाभ्यामात्मनः सद्भावासद्भावौ दर्शयतिनानंदमय

समाप३

अतः तस्यैव शारीरं आनंदमयस्य शारीरत्वश्रवणात् शारीरो हि शरीरसंबंधी जीवात्मा न तु
वेन जगत्कारणत्वं संभवति यादि तस्य ब्रह्मणः सत्यमित्यत्र यमन्नमयादीनन्तकम्यत्वं देवेन जगत्कारणमा
मा२ नंदमयस्तु प्रदर्शितं इति जगत्कारणं च तदेतेनेती तथेक्षणाकर्तृत्वं च सर्वेषु रस्मात् सत्यं सत्वजीवा
त्मातिरिच्यते अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तत्वमसि श्वेतकेतो इति कारणतया
निर्दिष्टस्य जीवसामानाधिकरण्यनिर्देशात् सामानाधिकरण्ये हि एकत्वमिति यादिनयरं यथा सोऽयं देव
दत्त इत्यादौ तेनाभूमिकाचस्य ऐक्यं तत्तस्य जीवस्यापरमेतदेव अतो ब्रह्मविदाप्नोतीति जीवस्याविद्या
ग्रस्तोपि निरंतरं रूपं प्राप्यत इत्युपदिश्यते यश्चि हि युक्तस्य तत्र रूपस्य लक्षणमिदमुच्यते सत्यं ज्ञानमनंतं
ब्रह्मेति तद्रूपप्राप्तिरेव हि मोक्षः न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वावसंतं न २५
पु५ प्रियाप्रिये स्पृशत इति अतो जीवस्याविद्याविनिर्मुक्तं रूपं प्राप्यत इत्यानंदमयस्तु उपदिश्यते त
थाहि शाखाचंद्रन्यायेनात्मस्वरूपं दर्शयितुमन्नमयः पुरुषस्तावत् प्रथमं शरीरं निर्दिश्य तदनन्तरं तत
स्य धारकं पंचवृत्तिं प्राणं तस्याप्यंतरं तमनः तदनंतरं तं च बुद्धिं प्राणमयो मनोमयो विज्ञानमय इति त २
त्तच्च बुद्ध्यवतारणा [illegible] यस्तु उपदिश्यान्त

श्री॰ भा॰ ९४

आनंदमयस्तु ज्ञानमयादानंदमयः प्रत्यगात्मेत्येवं प्राप्ते प्रचक्ष्महे आनंदमयोऽभ्यासात् आनंदमयः पर
मात्मा कुतः अभ्यासात् सैषानंदस्य मीमांसा भवतीत्यारभ्य यतो वाचो निवर्तन्त इत्येवमन्तेन वाक्येन
शतगुणितोत्तरक्रमेण निरतिशयदशाशिरस्कोऽभ्यस्यमान आनंदो न तु दुःखमिश्रपरिमितसु
खलवभागिनि जीवात्मनि संभवति निखिलहेयप्रत्यनीककल्याणैकतानं सकलेतरविलक्षणं प
रमात्मानमेव स्वाश्रयमावेदयति यदाह तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनंदमय
त्यर्द इति विज्ञानमयो हि जीवो न बुद्धिमात्रं मयट्प्रत्ययेन व्यतिरेकप्रतीतेः प्राणमये त्वगत्या स्वार्थिक
स्वार्थिकत्वमानर्थिक त्वमेवेति भावः ७ ताश्रीयते इह तु तद्धेतोर्जीवस्यासंभवादानर्थक्यं स्यात् अपि च दोषोऽकृत्स्नप्रत्यगात्मानन्द एवेत्यभ्य
धीमहि प्राणमयादौ तु मयडर्थासंभवेनान्नत्वमेव वक्ष्यते कथं तर्हि विज्ञानमयविषयश्लोके
विज्ञानं यज्ञं तनुत इति केवलविज्ञानशब्देनोपादानमुपपद्यते ज्ञातुरेवात्मनः स्वरूपमपि स्वप्रका
शतया विज्ञानमित्युच्यत इति न दोषः ज्ञातैकनिरूपणीयतया ज्ञातृस्वरूपस्य स्वरूपनिरू
प[illegible]णधर्मशब्दो हि धर्मभूतेन धर्मिस्वरूपमपि प्रतिपादयति गवादिशब्दवत् कृत्यल्युटो बहु ९४
लमिति वा कर्तरि ल्युडाश्रीयते नंद्यादित्वाद्वा ल्युः नंदिग्रह इत्यादिना कर्तरि ल्युट् अत एव विज्ञा
नं यज्ञं तनुते कर्माणि तनुतेऽपि चेति यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते न च बुद्धिमात्रस्य कर्तृत्वं सं

ज्ञानाज्ञानाभ्यां तथानंदमयस्य प्रियमोदादिरूपेण सर्वलोकविदितस्य सद्भावेऽपि ज्ञानाशंकायुक्ता
ततोऽनानंदमयमपि कुत्रापि लोके दृष्टान्तं तस्मादानंदमयादन्यद्ब्रह्म नैवं दं पुच्छं प्रतिष्ठेति
वी पुच्छं प्रतिष्ठा पृथिवी शिरसः पुच्छे प्रतिष्ठा महः पुच्छं प्रतिष्ठा इत्येवमुक्ता तत्रैव तेनोदाहृताः सर्
वाह वै प्रजाः प्रजायन्त इत्यादयः श्लोकाः यथानन्दमयप्रतिपादनपराः अपि तन्नमयादिपु
रुषमात्रप्रतिपादनपराः एवमन्नाद्यानंदमयस्यापि मस्तु त्वेचेति श्लोको ह्यानंदमयस्य प्रतिष्ठितस्य
पुच्छस्य आनंदमयस्यैव ब्रह्मत्वे प्रियमोदादिरूपेण रूपितस्यापरिच्छिन्नानंदस्य सद्भाव ज्ञानाज्
ज्ञानशंकायुक्तैव पुच्छब्रह्मणोऽपरिच्छिन्नानंदत्वमेव ब्रह्मसिद्धता शिरःप्रभृत्यवयवत्वाभावा
द्ब्रह्मणोऽनानंदमयं ब्रह्मेति चेन्न ब्रह्मणः पुच्छत्व प्रतिष्ठात्वाभावात्पुच्छमपि ब्रह्म न भवेत् अथापि
त्वापरिकल्पितस्य वस्तुनस्तस्यानन्यान्नयभूतत्वात् ब्रह्मणः पुच्छं प्रतिष्ठेति रूपणमात्रमिति चेत्त
र्हि तत्र शिरस्त्वाद्यात्मनस्यानंदमयस्य ब्रह्मणः प्रियशिरस्त्वादिरूपणं भविष्यति एवं च सत्यज्ञान
मनंतं ब्रह्मेति विकाराद्यपरिच्छिन्नवस्तुतया ज्ञातस्यास्त्वाद्यावृत्तिरानंदमयस्तु यदि ए
वे तत्तथानंदैकरसानंदरूपं ब्रह्मणो आनंदमयः इति मयट् प्राणमयः इत्याविकोद्दृष्टव्यः तस्मा
दविद्यापरिकल्पितविविधविचित्ररेखादिभेदभिन्नस्य जीवात्मनः स्वाभाविकं एकं रूपं स्वखण्डैकरस

श्री मुक्तावस्थस्यापि हि तस्य सर्गादिजगद्व्यापारासंभवो जगद्व्यापारवर्जं भोगमात्रसाम्यलिंगादित्यत्रोप
भा पादयिष्यते कारणभूतस्य ब्रह्मणो जीवस्वरूपत्वानभ्युपगमेऽनेन जीवेनात्मनानुतत्त्वमसीति सा
९५ मानाधिकरण्यनिर्देशः कथमुपपद्यत इति चेत् कथं वा निरस्तनिखिलदोषगंधस्य सत्यसंकल्प
स्य सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणगणस्य सकलभूतकारणस्य ब्रह्मणो
नानाविधानंतदुःखाकरकर्माधीनचिंतितनिमित्तादिसकलभूतजीवस्वरूपत्वं अन्यतर
स्य मिथ्यात्वेनोपपद्यत इति चेत् कस्य भोः किं हेयसंबंधस्य किं वा हेयप्रत्यनीककल्याणैकतान
स्वभावस्य हेयप्रत्यनीककल्याणैकतानस्य ब्रह्मणो नाद्यविद्याश्रयत्वेन हेयसंबंधः मिथ्या प्रतिभा
सो मिथ्यारूप इति चेत् विप्रतिषिद्धमिदमभिधीयते ब्रह्मणो हेयप्रत्यनीककल्याणैकतानत्वमवि
द्याश्रयत्वेनानंतदुःखविषयमिथ्याप्रतिभासाश्रयत्वं चेति अविद्याश्रयत्वेनानंतदुःखप्रतिभासा
श्रयत्वं चैव हि हेयसंबंधः तत्संबंधित्वं तत्प्रत्यनीकत्वं च विरुद्धमेव तथापि तस्य मिथ्यात्वान्नविरुद्ध
मिति मा वोचः मिथ्याभूतमप्यपुरुषार्थ एव तन्निरसनाय सर्ववेदांताः आरभ्यंत इति चेदितिरस्तनी ९५
याऽपुरुषार्थयोगस्य हेयप्रत्यनीककल्याणैकतानतया विरुध्यते किं च येनाश्रुतं श्रुतं भवतीत्ये
कविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय सदेव सोम्येदमग्र आसीदित्यादिना निखिलजगदेककारणतां तदे

84

भवति यचेतनेषु रथि चेतनोपकरणाभ्यन्तरेषु विज्ञानमयात्मा चीनेषु तन्मयादिष्वचेतनधर्मं तंकर्तृत्वं
श्रूयते अत एवं चाचेतनमचेतनं च स्वासाधारण्येन निलयनत्वानिलयनत्वादि धर्मे विशेषैर्विभज्य
निर्दिशद्भ्यां विज्ञानं चाविज्ञानं चेति विज्ञानशब्देन तद्गुणं चेतनं वदति तथान्नमयोपि विज्ञानमयो
योविज्ञाने तिष्ठन्नित्यस्य काण्वपाठगतस्य यथा पदस्थ्याने य आत्मनि तिष्ठन्निति पर्यायतयाधीयमा
नाः माध्यंदिनाः काण्वपाठगतविज्ञानशब्दनिर्दिष्टं जीवात्मेति स्फुटीकुर्वंति विज्ञानमिति च नैसर्गिकलि
गं वक्तृत्वाभिप्रायं तदेव विज्ञानमयो जीवादन्यः परमात्मानंदमयः यद्यपि विज्ञानं तनुतेति श्लोके
ज्ञानमात्रमेवोपादीयते न ज्ञाता तथाप्यन्योन्तर आत्मा विज्ञानमय इति तदा न ज्ञातैवोपदिश्यते यथा
प्राज्ञेश्वनाः प्रज्ञावंतरस्य चक्षुःसोके केवला प्रज्ञा यादातेपि सर्वापवद्गरुपोन्नरसमयस्तपवनान्नमात्रे निर्दि
ष्टं अपि तन्नदन्नमयान्नादिकारः एतस्मादेव तद्विभाग सूत्रकारः स्वयमेव भेदव्यपदेशादित्य नन्तरमे
व वदति यत्तु तनश्चकारणत्वयानिर्दिष्टस्य यनेन जीवेनात्मनानुप्रविश्य तत्त्वमसीति जीवसामा
नाधिकरण्यनिर्देशान्तरगतकारणमपि जीवस्वरूपान्नातिरिच्यत इति जीवस्यैव स्वरूपं ब्रह्मविदाप्नोति
परमिति प्रक्रान्तं ब्रह्मसत्वोहाद्वित्तनेनानंदमयस्तु यदि एवं तर्हि तदृणं जीवस्य चेतनत्वे सत्यपि
तदेतनवद्रूपं प्रज्ञापयेति तत्तेजोसृजतेति स्वस्मिन्कल्पयितुं वैकानंतविचित्रसृष्टियोगान्नुपपत्तेः

श्री·
भा·
८९

एतयोरुपलक्षितनिर्विशेषवस्तुमात्रस्यैव सद्भावश्रुतिर्जातः यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञा
तं स्यादिति दृष्टान्तेन वदतोऽपि एकविज्ञानेन तद्विकारस्य ज्ञाततानिर्दिश्यते न चापि विकारस्यासत्यताभिहितेति
चेत् मृद्विकारस्य रज्जुसर्पादिवदसत्यत्वमप्रत्यक्षसिद्धमिति प्रतिज्ञातार्थसंभावनाप्रदर्शनाय यथार
सोम्येति श्रुतिसिद्धवदुपन्यासो न युज्यते नच तत्त्वमस्यादिवाक्यजन्यज्ञानोत्पत्तेः प्राग्विकारजातस्यासत्य
ताभावाद् यत् तर्कानुगृहीतमननानुगृहीते वा प्रमाणमुपलभामहे उपमर्द्यस्तदनन्यत्वमारम्भणश
ब्दादिभ्य इत्यत्र वक्ष्यते तथा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजो
ऽसृजतेत्यादौ हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि सन्मूलाः सोम्ये
माः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वमित्यादिना स्वजगतः सदात्मकतास्रुष्टेः
पूर्वकाले नामरूपविभागाग्रहणाज्जगदुपादानं सच्छब्दवाच्यस्य ब्रह्मणः स्वव्यतिरिक्तनिमित्तान्तरानपेक्षत्वं
सृष्टिकाले बहुभवानन्तस्थिरत्रसरूपेण बहु स्यामित्यनन्यसाधारणः संकल्पविशेषः यथासंकल्पम
नेन विचित्रतत्त्वनाविलक्षणक्रमविशेषविशिष्टा सृष्टिः समस्तेषु चेतनेषु स्वात्मकजीवात्मप्रवेशेना
नेन नामरूपव्याकरणं स्वव्यतिरिक्तसमस्तवस्तूनां स्वमूलत्वं स्वायतनत्वं स्वप्रवर्त्यत्वं सेनैव जीवेन स्वप्रति ८९
ष्ठितत्वमित्यादयोऽनन्तविशेषाः शास्त्रैकसमधिगम्याः प्रतिपादिताः तत्सर्वं पितया प्रकरणान्तरेऽप्युप

95

न्तत्वद्रूपमिति सत्यसंकल्पतां च सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणस्य सक
लकारणभूतस्य ब्रह्मणः प्रतिपाद्य तस्यैव ब्रह्मणः तत्त्वमसीति सामानाधिकरण्येनानेन तु ः त्वाश्रयजीवे
कप्रतिपादितं तदन्यथानुपपत्त्या ब्रह्मण एवाविद्याश्रयत्वादि परिकल्पनीयमिति चेत् कृतोपपत्त
येऽननुपपत्तेर्विरुद्धं च न कल्पनीयं अपरे यमन्ये पुनरपारमार्थिकः कल्याणैकतानस्वभावतान्त
मिथ्याभूता एते वं तापत्रयाभिभूतचेतनोऽपि जीवविषयाप्रवृत्तेः पासंतत्रयत्रयाभिभूतिरेवास्यपारमार्थि
कीकल्याणैकतानस्वभावत्वभ्रांतिकल्पितः तिरोधायकमुख्यजीवत्वनि अपेतरोधायकं तिरोहीशपात्र
ब्रह्मणो निर्विशेषचिन्मात्रातिरिक्तजीवत्वतु ः विवादिके सत्यसंकल्पत्वजगत्कारणत्वकल्याणगुणत्वाद
पि मिथ्याभूतमिति कल्पनीयमिति चेत् अहो भवतो वाक्यार्थपर्यालोचनकुशलता एकविज्ञानेन सर्व श८
विज्ञानं प्रतिज्ञातं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावान्न संपद्यते यथैकविज्ञानं परमार्थविषयं
तथैव सर्वविज्ञानमपि यदि परमार्थविषयं न तदन्तर्गताना च तदा तद्धानेन सर्वविज्ञानमिति प्रतिज्ञा ते
वक्ते नहि परमार्थशुक्तिज्ञानेन तदाश्रयभूपरमार्थरजतज्ञानं भवति यथा कानकविज्ञानेन सर्व
विज्ञानप्रतिज्ञायाः अपसर्थः निर्विशेषब्रह्मात्मैव सत्यमन्यदसत्यमिति तर्हि येनाश्रुतं श्रुतं भवत्य
मतं मतमविज्ञातं विज्ञातमिति ... वाक्यस्यार्थः कार

श्री तदेवं वर्तमानकालविशिष्टतया प्रतिपादनात् एवमनेकधर्मदेशकालोपलक्षितस्वरूपमात्रैकं सामा
भा॰ नाधिकरण्येन प्रतिपाद्यते यद्यपि नीलमित्यादावनेकपदसमुल्लोऽप्रतीयमाने विशेषणसामानाधिक ९२
८ रण्ये वैलक्षण्यं विरोधान्न प्रतिपाद्यते तथापि वाच्यार्थप्रधानाश्रयप्रतिपादनान्न लक्षणा अपि तु वि
शेषणांशस्याविवक्षामात्रं सर्वत्र सामानाधिकरण्यस्य एवं स्वभाव इति न कश्चिद्दोष इति नन्विदम
सारं सर्वेष्वेव ताको बहुपदानां वृत्तिसिद्धार्थसंसर्गविशेषमात्रप्रत्याय्यं तत्र सामानाधिकरण्ये त
तान्यपि नीलादिपदानां नैल्यादिविशिष्टएवार्थो वृत्तिसिद्धः पदान्तरार्थसंसृष्टोऽभिधीयते
86 यथा नीलमुत्पलमानयेत्युक्ते नीलिमादिविशिष्टमेवानीयते यथा च विप्राट्यो मदमुदितो मुनिग
णस्तिष्ठतीति पदद्वयावगतविशेषणविशिष्टएवार्थः प्रतीयते एवं वेदान्तवाक्येष्वपि सामाना
धिकरण्यनिर्देशेषु तत्तद्विशेषणविशिष्टमेव ब्रह्म प्रतिपत्तव्यं न च विशेषणविवक्षया मितरविशि
ष्टाकारं वस्तुत्वेन विशेषितव्यं अपि तु सर्वविशेषणोपस्वरूपमेव विशेष्यं तथा हि भिन्नप्रवृत्तिनि
मित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं अन्वयेन निरूप्यावापोद्वापान्तरप्रतिपाद्याकाराद्आकारा ८७
न्तरयुक्ततया तस्यैव वस्तुनः पदान्तरप्रतिपाद्यत्वे सामानाधिकरण्यकार्यं यथा देवदत्तः श्यामो युवा
लोहिताक्षः अदीनोऽकृपणोऽनवद्य इति यत्रैकस्मिन् वस्तुनि समन्वयायोग्यं विशेषणद्वयं समानाधि

स्तथापत्त्यादिनिरस्तनिखिलदोषतासर्वज्ञतासर्वेश्वरत्वसत्यकामत्वसत्यसंकल्पत्वसर्वनिदंकरणाधि
पतित्वाद्यानंदादयः सकलेतरप्रमाणाविषयाः सहस्रशः श्रुतिप्रतिपादिताः एवमनन्यगोचरानंतविशेष
णविशिष्टब्रह्मपरामर्शितत्पदस्य निर्विशेषवस्तुमात्रोपदेशपरत्वमसमंजसं तेनोक्ततत्प्रति
पिपादितत्वे यदंचसंसारित्वविशिष्टजीववाचितस्यापि निर्विशेषवस्तुरूपोपस्थापनपरत्वेस्वार्थः परि
त्यक्तः स्यात् निर्विशेषप्रकाशस्वरूपस्य च वस्तुनः स्वविद्यातिरोधानेस्वरूपनाशप्रसंगादिभिर्न
ष्टमवतीति पूर्वमेवोक्तं एवंच सति समानाधिकरणप्रवृत्तयोस्तत्त्वमितिद्वयोरपि पदयोः मुख्या
र्थपरित्यागेन लक्षणा च समाश्रयणीया अपरोक्षेन समानाधिकरणप्रवृत्तानामेकार्थप्रतिपादन
परतया विशेषणांशतात्पर्यसंभवादेव विशेषणनिवृत्ते वस्तुमात्रैकत्वप्रतिपादनार्थलक्षणा
प्रसंगः यथा नीलमुत्पलमिति पदद्वयमपि विशिष्टैकार्थप्रतिपादनपरत्वेन नीलत्वोत्पलत्वरूपवि
शेषणद्वयं न विवक्षते तद्विवक्षायां हि नीलत्वविशिष्टाकारेणोत्पलत्वविशिष्टाकारस्यैकत्वप्र
तिपादनं प्रसज्यते तच्च न संभवति नहि नैल्यविशिष्टाकारेण तद्वन्नैवोत्पलपदेन विशिष्यते जाति
गुणयोरन्योन्यसमवायप्रसंगात् अतो नीलत्वोत्पलत्वोपलक्षितनवस्तुमात्रेसामानाधिकर
ण्येन प्रतिपाद्यते यथा सोयं देवदत्त इत्यादिततत्कालविप्रकृष्टदेशादिविशिष्टस्यनैकरूपेणासन्निहि

श्री
भा॰
२८

रत्वादिभिः अन्यथा प्रतीतिविरोधे सति सर्वेषां द्रव्याणां कर्मैव स्यात् देशद्वयसंबंधविरोधस्तु कालभेदेन
परिहियते । यत्तु समानाधिकरणपदाभावेनैकविशेषणविशिष्टकार्यवाचित्वं तत एवारुणयैकहा
यन्या पिंगाक्ष्या सोमं क्रीणातीत्यारुण्यादिविशिष्टैकहायन्या क्रयसाधनत्वं विधीयते यदुक्तं अर्थैक विधी२
त्वेऽरुणाया ऐकवाक्यादनियमः स्यादिति तत्रैव पूर्वं प्रतीयते यद्यप्यरुणयेति पदमारुण्ये विगुण
स्यापि द्रव्यप्रकारत्वेनैकस्वभावत्वात् द्रव्यपर्यन्तमेवारुण्यमात्रमभिदधाति तथाप्येकहायन्यन्वय
नियमो ह्यारुण्येन संभवति एकहायन्या सोमं क्रीणातीत्यत्र रूपायेत्यर्थद्वयविधानासंभवात् तत
आरुणयेति वाक्यं भित्वा प्रकरणविहितसर्वद्रव्यपर्यन्तमेवारुण्यमात्रमविशेषेणाभिदधाति अरु
णयेति स्त्रीलिंगनिर्देशः प्रकरणविहितसर्वलिंगकद्रव्याणां प्रदर्शनार्थः तस्मादेकहायन्यन्वये
नियमो ह्यारुण्यं न स्यादिति अत्राभिधीयते अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् अरुणये
कहायिन्यारुण्यविशिष्टद्रव्यैकहायिनीद्रव्यवाचिपदयोः सामानाधिकरण्येनार्थैकत्वसिद्धेस्समे
कहायनीद्रव्यारुण्यगुणयोररुणयेतिपदेनैव विशेषणविशेष्यभावेन संबंधितयाभिहितयोः के
याश्चैककर्मान्वयाविरोधादारुण्यं क्रयसाधनभूतैकहायन्यान्वयनियमः स्यात् यद्येकहायन्या २८
क्रयसंबंधवदारुण्यमसंबंधो वाक्याववसेयः स्यात् तदा वाक्यस्यार्थद्वयविधानं स्यात् न चेत्तदस्ति प्र

करणपदनिर्दिष्टेन ज्ञाप्यत्वमनन्तरत्वेदं सर्वत्र चानुगमाभाष्यीयते यथा गौर्वाहीकरति नीलोत्पलादिषु न विशेष
णाद्यन्वयानुपपत्तिविरोधादेकमेवाभयविशिष्टं प्रतिपाद्यते अथ मन्नय एकविशेषणप्रतिसंबंधित्वेन निरूप्यमा
णविशेषणान्तरप्रतिसंबंधित्वादिलक्षणमिति नीलघटपटयोरिति वेवाक्यविभक्तिनिर्देशो द्व्येकप्रतिपादनासंभवात्स
मानाधिकरणशब्दस्य न विशिष्टप्रतिपादनपरत्वं अपि तु विशेषणमात्रेण तत्स्वरूपमात्रस्य व्यक्तेः प्रति
पादनपरत्वमेवेति स्यादेतदेवं यदि विशेषणद्वयप्रतिसंबंधित्वमात्रमेवैक्यनिरूप्यात् न चैतदस्ति एक
स्मिन्नपि लघुपस्तहस्तिमशकमपि मेद्द्वयविशिष्टत्वमेव संकलनेन निरूपणाद्धि अप्रामाण्यपत्ताच्च घटादिशक्तिघ
टत्वपटत्वयोः नीलमुत्पलमित्यादिषु नन्दं डित्थकुरालितवत्स्वरूपैक्यरसत्वे [illegible]ध्वनादिवच्च विरोधो
नोपलभ्यते न केवलमविरोध एव प्रवृत्तिनिमित्तभेदेन कार्यबोधकत्वरूपसमानाधिकरण्यमुपपादयन्
धर्मद्वयविशिष्टत्वं अन्यथा स्वरूपमात्रैक्ये त्वनेकपदप्रवृत्तौ निमित्ताभावात्सामानाधिकरण्यमेव न स्यात्
विशेषणानां संबंधानादरेणावस्थानस्वरूपोपलक्षणापरत्वे सत्येकेनैव वस्तूपलक्षितमित्युपलक्षणान्तरम
नर्थकमेव उपलक्षणान्तरोपलक्ष्याकारान्युपगमे तेनाकारेण सविशेषणत्वप्रसंगः सोऽयं देवदत्त इत्य
त्रापि न लक्षणगंधो विद्यते विरोधाभावाद्देशान्तरसंबंधितया तीतस्य सतिहितदेशसंबंधितया वर्तमान
त्वाविरोधात् अन्यत्वेऽपि मिति पूर्वसिद्धायां कालद्वयसंबंधितो न कस्य न गेकारूपपायेने वस्तुनः स्थि

गुणशब्दस्तद्वदसमानाधिकरणे ...
उदेद्रव्यष्वि

गुणानांद्रव्यप्रकारतैकस्वभावत्वान्द्रव्यपर्यन्ता
भिधायित्वं

हणायेनिपदेनकेवलगुणस्यैवाभिधानमिति तन्नोपपद्यते लोकवेदयोर्द्दश्यवाचिपदसमानाधिक
श्री॰ रणस्यगुणवाचिनः क्वचिदपिकेवलगुणाभिधानादर्शनात् उपात्तद्रव्यकवाक्यस्यगुणपदंकेवल
भा॰ गुणाभिधायीत्यसंगतं यदप्युक्तं दृष्टादिष्वपात्तद्रव्यकेपिगुणविशिष्टस्यैवाभिधानात् परस्प ५२
८२ रमुक्तत्वेत्रशौक्ल्यविशिष्टपटाप्रतिपत्तिरसमानविभक्तिनिर्देशात्तत्रानपुनस्तयात्तद्रव्यकवाक्ये
न तत्रैवपटस्यशुक्लोभागइत्यादिष्वसमानविभक्तिनिर्देशेपीत्यादिविशिष्टंद्रव्यं प्रतीयते य
त्पुनः क्रयस्यैकहायन्यावरुद्धत्वयारुणिम्नः क्रयान्वयोनसंभवतीतितदपिविरोधिगवैवयाः क्रय
४४ साधनत्वान्वयपत्याशौन्यरस्परान्वयःस्त्रियातीत्यप्यसंगतं भत्नायथोक्तएवार्थः तस्मात्त
मस्यादिसामानाधिकरण्येपदद्वयाभिहितविशेषणपरित्यागेनैवैकपदप्रतिपादनंवर्णितीय
त्वनाशुविशेषपरिहितानवधिकदुःखभागिनः श्रुत्यु श्रुतिमयावस्याचेतनादर्थान्तरभूतमशेषहे
यप्रत्यनीककल्याणगुणैकतानंपरमात्मानमनभ्युपगच्छतोनसंभवति अभ्युपगच्छतोपिसमा
नाधिकरणपदार्थतंयथावस्थितविशेषणविशिष्टैकवस्तुप्रतिपादनेनपरत्वासम्पदयोर्त्वंपदप्रतिपन्नसक २९
लदोषभागित्वंपरस्यप्रसज्येतइतिचेत् नैतदेवंत्वंपदेनापिजीवान्तर्यामिणः परस्यैवाभिधानात्
एतदुक्तंभवति सच्छब्दाभिहितंनिरस्तनिखिलदोषगंधंसत्यसंकल्पमिथ्याज्ञानवधिकातिशयक

रूपायेतिपदेनैवाकृतिमद्विशिष्टद्रव्यमभिहितं एकार्थनीयदसामानाधिकरण्येननस्यैकदानीत्व
मात्रमेवनाण्यतेनुपमासंबंधो विशिष्टद्वयोकामेवद्धिसामानाधिकरण्यार्थः भिन्नप्रवृत्तिनिमित्तानाम्
शब्दानामेकार्थेवृत्तिःसामानाधिकरण्यमितिहितच्चेतां यतएवतत्क्रः पचतोभवतीत्यादिसूत्रकाण्योरे
कवाक्यतयपदस्यभवनक्रियासंबंधोहिताकूसार्थागमसंबंधपत्नुरक्तपदेनेवाभिहितः तथासंबंधिद्रव्यं
पटत्येतावन्मात्रेसामानाधिकरण्येनावसेयएवमेकेनपदेनद्रव्याभावद्रूमिवोलेनतेनपदेसमस्तेषु नष नष
तेनवाविशिष्टत्वमुपपत्त्याप्यसामानाधिकरण्येनसर्वविशेषणविशिष्टार्थएकत्रतिष्ठायविन्यातस्य
क्रियासंबंधाभिधानमविरुद्धं देवदत्तःपचतोभुवालोहितात्तःदरद्गुणस्वविशिष्टः शुक्लेनवास
सायवनिकामाधारेण नीलमुत्पलमानयगामानवशुक्लांशोभनांदी यत्रद्वेयपिकृतेनद्रोणस
मष्टाकपालंनिर्वपेत् एवमन्यत्रापेकार्थस्याप्याख्यातोमंक्षीतालीति एवदङ्कंभवति यथाकादेः
स्थास्यामोदनंपचेदित्यनेककारकविशिष्टैकाक्रियामुपपत्स्यतीयत्ने तथासमानाधिकरणपद
संघाताभिहितेएकैककारकेनानाकारकमतिथतिवेलायामेवानेकविशेषणविशिष्टमुपयत्स्यति
पचेत्क्रियायामनेनीतिनकश्चिद्विरोधः त्वादिरेःसुब्बैः कार्टस्समपरिमाणंाडेयापसंपत्स्याद
नेसमर्थःयाचकःपचेदित्यादिकिति यचकतथानरूपवाक्यस्यमाणपरब्रुःकेवलाननामिधायीत्व

यमयति स त आत्मान्तर्याम्यमृत इत्यादि यः पृथिवीमन्तरे संचरन् यस्य पृथिवी शरीरं यः अपामंतरे
संचरन् यस्यापः शरीरमित्यारभ्य योऽक्षरमंतरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभू
तांतरात्मापहतपाप्मा दिव्यो देव एको नारायण इत्यादीनि सचेतनं जगत्तस्य शरीरत्वेन निर्दिश्य
तस्यात्मत्वेन परमात्मानमुपदिशंति अतश्चेतनाचेतनवाचिनोपि शब्दाः तत्तस्याप्यात्मभूतं
चेतनशरीरकं परमात्मानमेवाभिदधति यथा चेतनदेवादिसंस्थानपिंडवाचिनः शब्दास्तच्छ
रीरकजीवात्मन एव वाचकाः चत्वारः पंचदशरात्रा देवत्वं गच्छेतीत्यादिषु देवा भवंतीत्यर्थः श
रीरस्य शरीरिणं प्रति प्रकारत्वात् प्रकारवाचिनां शब्दानां प्रकारिण्येव पर्यवसानात् शरीराभिधा
यिनां शब्दानां शरीरिपर्यवसानं न्याय्यं प्रकारो हि नाम इदमित्थमिति प्रतीयमानेव स्तुनीत्थमि
ति प्रतीयमानोंऽशः तस्य तदसत्त्वे तत्त्वेन तदप्रतीतेस्तदपृथक्सत्वात् तस्मिन्नेव पर्यवसानं युक्तमिति
तस्य प्रतिपादकोपि शब्दः तस्मिन्नेव पर्यवस्यति अत एव गौरश्वो मनुष्य इत्यादिप्रकारभूताकृतिवा
चिनः शब्दाः प्रकारिणि पिंडे पर्यवस्यंतः पिंडस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात् पिंडशरीरके चेतनस्या
पि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्यवस्यंतीति सर्वशब्दानां परमात्मैव वाच्य इति परमात्मवाचकश
ब्देन सामानाधिकरण्यमुपलक्ष्य इतमेव ननु खंडो गौः खंडः शुक्ल इति जातिगुणवाचिनामेव पदानां इयमवा

९०

स्याण्वंशभूतं समस्तकारणमात्मानं परंब्रह्म बहुस्यामिति संकल्प्य तेजोबन्नमयं कृत्स्नं जगत्सृष्ट्वा तस्मिन्
देवादिविचित्रसंस्थानसंस्थिते जगति चेतनं जीववर्गं स्वकर्मानुरूपेण शरीरेष्वात्मतया प्रवेश्य प्रपञ्च
पञ्चत्वेकैकस्य जीवान्तरात्मतयानुप्रविश्य एवंभूतेषु स्वव्याप्येषु देवाद्याकारेषु संस्थानेषु नामरूपव्या
करोत्। एवंरूपसंघातस्यैव वस्तुत्वशब्दवाच्यत्वं चाकरोदित्यर्थः। अनेन जीवेनात्मनानुप्रविश्येति
निर्देशो जीवस्य ब्रह्मात्मकत्वं दर्शयति। ब्रह्मात्मकत्वं च जीवस्य जीवान्तरात्मतया ब्रह्मणोऽनुप्रवेशा
दित्यवगम्यते। इदं सर्वमसृजत। यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य सच्च त्यच्चा
भवदित्यत्रेदं सर्वमिति निर्दिष्टचेतनाचेतनवस्तुद्वयस्य सत्त्यच्छब्दाभ्यां विज्ञानाविज्ञानशब्दाभ्यां विभज्य
निर्दिष्टस्यैव वस्तुनः अन्तर्यामिणानुप्रवेशाभिधानात्। अतएव नामरूपव्याकरणात् सर्वे च काः श
सूक्ष्मचिज्जीवविशिष्टपरमात्मवाचिनः इत्यवगतमिति। किंच ऐतदात्म्यमिदं सर्वमिति चेतनमि
श्रप्रपंचमिदं सर्वमिति निर्दिश्य तस्य स आत्मेति श्रुतिप्रतिपादितम्। एवं च सर्वं चेतनाचेतनं जगत्तस्य श
रीरं भवति। तथा च अन्तर्यामिश्रुतिः। प्रविष्टः शास्ता जनानां सर्वात्मा। यः पृथिव्यां तिष्ठन् पृथि
व्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्मान्तर्याम्यमृत
इति आरभ्य यः आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं यः आत्मानमन्तरो

श्री॰ भा॰ २२ परमात्मा पठ्यते तस्यैष एव शारीर आत्मेत्यानंदमयस्य शारीरत्वश्रवणात् जीवादन्यत्वेन संभवतीति न
वाच्यं तस्मिन्प्रकरणे सर्वत्र तस्यैष एव शारीर आत्मा यः पूर्वस्येति परमात्मन एव शारीर आत्मत्वाभि
[illegible] धानात् कथं तस्माद्वा एतस्मादात्मन आकाशः
संभूत इत्याकाशादेः सर्वस्य परमकारणत्वेन प्रतिज्ञातजीवव्यतिरेकस्यैकस्य ब्रह्मण आत्मत्वेन
व्यपदेशात् तत्श्रुतिविज्ञाकाकाशादीनामन्नमयपर्यंतानां तत्कार्यत्वमवगम्यते यस्य पृथिवी शरी
रं यस्यापः शरीरं यस्य तेजः शरीरं यस्य वायुः शरीरं यस्याकाशः शरीरं यस्याक्षरं शरीरं यस्य मृ
त्युः शरीरं एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति सुबालश्रुत्या सर्वेषां तत्वानां प
रमात्मशरीरत्वं स्पष्टमभिधीयते अतस्तस्माद्वा एतस्मादात्मन इत्यन्नमयस्य परमात्मैव शारीर
आत्मेत्यवगतः प्राणमयेऽप्यनुवाद॥ तस्यैष एव शारीर आत्मा यः पूर्वस्येति पूर्वस्यान्नमयस्य यः शा
रीर आत्माश्रयसिद्धः परमकारणभूतः परमात्मा स एवैतस्य प्राणमयस्यापि शारीर आत्मेत्यर्थः
एवं मनोमयविज्ञानमययोर्द्रष्टव्यः आनंदमयेऽप्येवेति निर्देशः तस्यानन्यात्मकत्वदर्शयितृत्वेन २२
कथं विज्ञानमयस्यापि पूर्वोक्तया नीत्या परमात्मैव शारीर आत्मेत्यवगतः एवं सति विज्ञानमयस्य
यः शारीर आत्मा स एवानंदमयस्यापि शारीर आत्मेत्युक्ते आनंदमयस्याभ्यासावगतपरमात्मभा

वाच्यैक्ये सामानाधिकरण्यं दृष्टं द्रव्याणां द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययोऽदृष्टः यथा दण्डी कु-
ण्डलीति नैवं जातिर्वा गुणो वा द्रव्यं वा नैतेषामेकमेव सामानाधिकरण्ये प्रयोजकं अन्यान्यस्मिन् व्यभि-
चारात् तस्य कस्यचित् प्रकारतयैव सद्भावः तस्य तदपृथक्सिद्धिनियतमिति मिलद्वाचकानां श-
ब्दानां सामानाधिकरण्यविशिष्टद्रव्यवाचित्वात् धर्मान्तरविशिष्टतद्द्रव्यवाचिना शब्देन सामानाधिकरण्यमुप-
ते यत्र पुनः पृथक्स्थितियोग्यस्यापि तस्यैव द्रव्यस्य कदाचित् द्रव्यान्तरप्रकारत्वमभ्युपगम्यते तत्र मत्वर्थीयप्र-
त्ययनियमः तदेवं परमात्मनः शरीरतया तत्प्रकारत्वात् चिदचिद्विशिष्टजीवस्वरूपविशिष्टजीवस्व [illegible]
ति देहाद्विवेचयन् अहं त्वमित्यादि प्राह परमात्मानमेवाचष्टे इति तत्त्वमसीति सामानाधिकरण्ये-
नोपसंहृतं एवं तस्य परमात्मानं प्रति जीवस्य शरीरतया हेया जीवगता धर्माः परमात्मानं न स्पृ-
शन्तीति यथा खलु शरीरगता बालत्वयुवत्वादयो धर्मा जीवं न स्पृशन्ति अतस्तत्त्वमसीति सामानाधिकर-
ण्येन त्वं हं जगत्कारणभूतं सत्यसंकल्पं सर्वकल्याणगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाच-
ष्टे तदिति च तमेव सशरीरकं जीवशरीरकमाचष्टे इति सामानाधिकरण्यमुख्यवृत्तं प्रकरणविरो-
धः सर्वथा त्वविरोधो ब्रह्मणि निरवद्यत्वकल्याणैकतानेऽविद्यादिदोषगन्धाभावस्य अतो जीवसामानाधि-
करण्यमपि विशेषणभूतजीवान्तर्यामितया तदुपपद्यत इति विज्ञानमयान्नीवादन्य एवानन्दमयः

श्री॰ भा॰ ५२

सद्भावाच्चानंदमयः परंब्रह्मेति यो विकारमयटो योगादेवा न्मयटो विकारार्थत्वमप्यविरोधान्न संभवति किंचो
त्तिरूपं प्राणमयादवयवपरिस्मिन्कं तत्र विकारार्थत्वासंभवात् अतस्तत्र पंचवृत्तेर्वायोः प्राणवत्तामात्रेण यथा प्राण
मयत्वं प्राणादीनामानादिभ्रूयेव स्वनिष्ठप्राणवृत्तेः प्रचुरत्वाद्वा न च प्राचुर्यार्थेऽपि मयट्प्रयोगस्य प्रोक्तिर्नास्ति अन्नम
योयज्ञः शाकटमयी यात्रेत्यादिदर्शनात् यद्वानंदप्राचुर्यमल्पदुःखसद्भावमवगमयतीति न
द्वतत् नन्वत्र चु वचे हितन्मभत्वमेव तद्धेतुरस्य सतां नावगमयति अपितु तस्याल्पत्वं निवर्तयति इत्यपस
द्भावासद्भावौ प्रमाणांतरावसेयौ इह च प्रमाणांतरेण तदभावो वगम्यते अपहतपाप्मेत्यादिना नचैवा
वदेवमस्तु अस्यानंदस्य प्रभूतत्वमस्यानंदस्याल्पत्वमपेक्षत इति उच्यते तत्र एकोमानुष आनंद इत्या
दिना जीवानंदापेक्षया ब्रह्मानंदो निरतिशयदशापन्नः प्रभूत इति यद्योक्तं जीवस्यानंदविकारत्वं संभव
तीति तदपि नोपपद्यते जीवस्य ज्ञानानंदैकगुणस्वरूपस्य केन विकारेण स्वदेवपदार्थाकारेण परि
णामः सकलश्रुतिस्मृतिन्यायविरुद्धः संसारदशायां तत्कर्मणा ज्ञानानंदौ संकुचितावित्युपपादयि
ष्यते अतस्त्वानंदमयो जीवादन्यः परंब्रह्म इतश्च जीवादन्य आनंदमयः श्री तद्धेतुव्यपदेशाच्च श्री
को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयातीति एष एव जीवानानंदय ५२
तीति जीवानामानंदहेतुरयं व्यपदिश्यते अतस्त्वानंदयितव्याज्जीवादानंदयिताय मन्यआनंदम

वस्य परमात्मनः स्वयमेवात्मेत्यवगम्यते एवं वस्तव्यतिरिक्तं चेतनाचेतनवस्तुजातं स्वशरीरमिति
सर्वविनिरुपाधिकः शारीर आत्मा अत एवेदं परब्रह्माधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैरभिधी
यते अतो विज्ञानमयाज्जीवात्पर एव परमात्मानंदमयः ननु नायमानंदमयो जीवात्परो विकारवाच
स्य मयटः श्रवणात् न मयड्वैतयोरिति प्रकृत्य नित्यं वृद्धशरादिभ्य इति विकारार्थे मयट् स्मर्यते
वृक्षस्यायमानंदः शारीरः ननु प्राचुर्यार्थोपि मयडस्तीति न स्वरूपवचनेन मयडिति स्मृतेः यथान्नमयो यज्ञ
इति एवं प्राचुर्यं भविष्यति नैवं अन्नमयस्तु प्रकृते विकारार्थत्वं दृष्टं अत औचित्यादस्यापि विकारार्थत्वमेव
युक्तं किंच प्राचुर्यार्थत्वेपि जीवादन्यत्वं न सिध्यति तथाहि आनंदप्राचुर्यं नाम दुःखमिश्रत्वमवर्जनीयं
आनंदस्य प्राचुर्यं दुःखस्याल्पत्वमवगमयति दुःखमिश्रत्वमेव हि जीवत्वं अत औचित्यप्राप्तविकारार्थ
त्वमेव युक्तं किंच लोकेप्याम्रमयं हिरण्मयं दारुमयमित्यादिषु वेदे च पर्णमयी जुहूः शमीमय्यः स्रुच इत्यादिषु
मयीत्येतेष्वादिषु सर्वत्र विकारार्थमयो व्याप्तत्वात् स एव प्रथममनंदमयमपि तेनेति जीवस्यैवान
न्दविकारत्वमस्त्येव तस्यास्त आनंदस्य मन्तः संसारितावस्थान विकार एवेति अतो विकारवाचिनो
मयटः श्रवणादानंदमयो जीवादनतिरिक्त इति तदिदमनुभाष्य परिहरति श्री विकारप्रा
इति चेन्ना [illegible] किंन वयमानंदमयप्राचुर्यात्प्राचुर्यार्थे मयटं वद

तेनवात्र एतदुक्तं भवति शन्तद्युतितिर [illegible] नास्त्क्रमेणाभ्यस्यमानस्यानंदस्य जीवाश्रयत्वासंभवात्तद्वलाम

श्री वर्त्तित्वविपृषोदरादित्वात् पदपञ्चकस्य वचस्यपञ्चकस्य लोपं कृत्वा अशुभ्यादित्वाद्विपश्चिच्छब्दः । यद्यपि मन्द
स्यापि विपश्चित्त्वं संभवति तथापि न पेवात्मनः संसारदशायामविपश्चित्त्वमप्यस्तीति निरुपाधिकं विपश्चि
भा· त्त्वेनोपपद्यते निर्विशेषचिन्मात्रतापन्नस्य ब्रह्मणः स्वविविधदर्शनासंभवात् अतो विपश्चित्त्वं न संभवतीति
५३ न केनापि प्रमाणेन निर्विशेषं वस्तु प्रतिपाद्यत इति पूर्वमेवोक्तं यतो वाचो निवर्तन्त इति चेत् । किं यदि च
न५ वाङ्मनसयोर्ब्रह्मणो निवृत्तिमभिदधीत ततो निर्विशेषतावक्तव्यतो वगस्यते शक्नुयात् । अपितु वाङ्मनस
योस्तत्राप्रमाणतां वदेत् । तत्र च सति तस्य तुच्छत्वमेवापद्यते । ब्रह्मविदाप्नोति परमित्यारभ्य ब्रह्मणो विपश्चित्त्वं जग
त्कारणत्वमानंदैकतानत्वमिति राज्ञान्नत्वानंदयितृत्वं कामादेव विचित्रात्मकस्य जगतः सृष्टत्वं सृष्टस्य
जीवेनानुप्रवेशात्त्वदात्मकत्वं भयाभयहेतुत्वं वाय्वादित्यादीनां प्रशास्तृत्वं शतगुणितोत्तरक्रमेण निरतिश
यानंदत्वमन्यच्चानेकं प्रतिपाद्य वाङ्मनसयोर्ब्रह्मणः प्रवृत्त्यभावेन निष्प्रमाणकेवलमेव स्यादिति भ्रान्त
जल्पितं । यतो वाचो निवर्तन्त इति पञ्चम्या निर्दिष्टमपर्यमानंदं ब्रह्मणो विद्वानिति आनंदशब्देन प्रतिनिर्दि
श्यतस्य ब्रह्मसंबंधित्वं ब्रह्मणः इति व्यतिरेकनिर्देशेन प्रतिपाद्यते वाङ्मनसगोचरं विद्वानिति तदे ५३
वमस्मिन्नपरं ब्राह्मं जरद्गवादिवाक्यवदनर्थकं वाक्यं न तु ग्रीन चस्मात् । अतः शतगुणितोत्तरक्र
मेण ब्रह्मानंदस्यातिशयिततावल्कं उपन्यस्य तस्य यत्ताभावादेव वाङ्मनसयोः ततो निवृत्तिर्यतो वा

यः परमात्मेति विज्ञायते आनंदमय एवात्मानंदरूपो ह्येनो च्यत इति चानंतरमेवोच्यते एतस्य जीवात्मन
८२ आनंदमयः श्री आनंदवल्लिसूत्रविवरणीयते श्री सत्यं ज्ञानमनंतं ब्रह्मेति मंत्रवर्णोदितब्रह्मैवानंदमय इति
गीयते तज्जीवस्वरूपादन्यत्परं ब्रह्म तथाहि ब्रह्मविदाप्नोति परमिति जीवस्य प्राप्यतया ब्रह्मनिर्दि
ष्टं तदेषाभ्युक्तेति तदृचाभिन्नत्वीकृत्य पश्यति आप्यतया परिगृह्य ब्रह्मणोवाप्येत्वमिति मा भूदाशंकेत्यस्या
ऽप्यर्थे शास्त्रमनेनानंदेन प्रतिक्रियत इत्यर्थः जीवस्योपासकस्य प्राप्यं ब्रह्म तस्माद्धि लक्षणमेव अनंतरं खलु
तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यारभ्यानंतरानंतरैर्ब्रह्मलक्षणैर्नैव मन्नेदं विशदीक्रियते अतो जी
वादन्य आनंदमयः अन्नाद्यं यथा उपासकात्प्राप्यस्याभेदेन भवितव्यं तथापि न वस्तुनः जीवात्मा वे ३
र्विकं ब्रह्म किंतु तस्यैवोपासकस्य निरतिशयानंदं निर्विशेषविज्ञानैकरसमद्वयं स्वरूपं तदेव सत्यज्ञान
मनंतं ब्रह्मेति मंत्रेण विशोध्यते तदेव यतो वाचो निवर्तंते अप्राप्य मनसा सहेति वाङ्मनसयोरगोचरं तथापि
विषयमिति तात्पर्यं अतस्तदेवमांत्रवर्णिकमिति तस्मादन्यतिरिक्त आनंदमय इति अत उत्तरं पठति
श्री नेतरोऽनुपपत्तेः श्री परमात्मन इतरो जीवशब्दाभिलप्योऽत्मनाऽवस्थापि न भवति मायावर्णितः कु
तः अनुपपत्तेः तथाविधस्यात्मनो निरुपाधिकविपश्चित्त्वानुपपत्तेः इदमेव हि निरुपाधिकं विप
श्चित्त्वं सोऽकामयत बहु स्यां प्रजायेयेति सत्यसंकल्पस्य दर्शितेन तत्कर्तृत्वेन प्रतिपद्यते विविधं यदुपपत्तिं तद्वि

श्री भा० ९५

नेदयाहेनानंदमय एव व्यपदिश्यते यथा विज्ञानवाहेन विज्ञानमयः अतएवानंदं ब्रह्मणो विद्वानिति
व्यतिरेकनिर्देशः अतएवैतमानंदमयमात्मानमुपसंक्रामतीति फलनिर्देशश्च उत्तरवेदान्तवाक्ये भृ
गुवल्ल्यां कोशान्नमयादीनामन्नं ब्रह्मेति व्यजानात् प्राणो ब्रह्मेति व्यजानात् मनो ब्रह्मेति व्यजानात्
विज्ञानं ब्रह्मेति व्यजानादिति प्रतिपादनात् आनंदो ब्रह्मेत्यस्यानंदमयस्यैव प्रतिपादनमिति विज्ञाय
ते तत एवमानंदमयमात्मानमुपसंक्रम्येत्युपसंहृते अतः प्रधानशब्दाभिलप्यादर्थान्तरभूत
स्यापरस्य ब्रह्मणो जीवशब्दाभिलपनीयादपि वस्तुनोऽर्थान्तरत्वं सिद्धं यद्यपि मंदगुणानां जीवानां
कामान्नगतस्पृष्टिः श्रुतिशायितानंदयोगो भयाभयहेतुत्वमित्यादि न संभवति तथापि विलक्षणपुण्य
नामादित्यैश्वर्यप्रजापतिप्रभृतीनां संभवत्येवेतीमामाशंकां निराकरोति श्री अंतस्तद्धर्मोपदेशात्
श्री इदमामनंति छांदोग्ये य एषोंऽतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आ
प्रणखात्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्म
भ्यः उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद तस्य ऋक् च साम च गेष्णौ इत्यधिदैवतं अथाध्यात्मं
अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यद
मुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति तत्र संदिह्यते किमयमक्ष्यादित्यमण्डलान्तर्व ९५
र्ती पुरुषः पुण्योपचयनिमित्तैश्वर्य आदित्यादिशब्दाभिलप्यो जीव एव उत तद्व्यतिरिक्तः प

निःशेषं तैतरुच्यते एवमियत्तारहितं ब्रह्मण आनंदं विद्वान् न बिभेति कुतश्चनेति न बिभेतीत्युच्यते किं चास्य सांशत्वात्
कस्यचिदंशितः सोऽकामयतेत्यारभ्य बहु स्यामात्मसंकल्पाच्चेदं जगज्जन्मस्थितिलयादेरात्मत्वादे
र्भुक्तात्मस्वरूपादन्यत्वं तस्य स्पष्टमेव अतस्त्रैमयावस्थात्मनोऽन्य आनंदमयः श्रीभेदव्यपदेशा
च्च तस्माद्वा एतस्माद्वा आत्मनस्त्वारस्य मांत्रवर्णिकब्रह्मत्वं ... अन्नप्राणमनोमयरूपजीवादन्यस्य
भेदं व्यपदिशति तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनंदमय इति अतो जीवाभेदव्यपदे
शाच्चायं मांत्रवर्णिक आनंदमयोऽन्य एवेति विज्ञायते तस्य जीवादन्यः श्रीकामाच्च नानुमानापेक्षा
श्री जीवस्यापि प्रधानस्य जगत्कारणत्वे सर्वज्ञानीयानुमानिकप्रधानादिशब्दाभिधेयाविद्वत्त
संसारी चेतनो नो चेद्धिरण्यगर्भादीनां कारणत्वं इह च सोऽकामयत बहु स्यां प्रजायेयेति श्रुत्विस्तंसर्गा
दर्शि वहितत्वात्कामादेव विचित्रचिदचिज्जगतः सृष्टिः इदं सर्वमसृजत यदिदं किंचेत्याम्नायते अतोऽस्यानं
जप दमयस्य जगत्कर्तृत्वेनानुमानिकापि द्रव्यसंसार्यपेक्षा प्रतीयते अतस्त्व जीवादन्य आनंदमयः ३
तस्य श्री अस्मिन्नस्य च तद्योगं शास्ति श्री अस्मिन्नानंदमयेऽस्य च जीवस्य तद्योगं आनंदयोगं
शास्ति शास्त्रं रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनंदी भवतीति रसशब्दाभिधेयानंदमयलाभादयं जीवप्र
त्यभिलषनी यथानंदी भवतीत्युच्यमाने यन्लाभादानंदी भवति स तत एवेत्यनुज्ञानतः कोह्येवान्यात्
कः प्राण्यात् एवमानंदमयः ... आनंदे ब्रह्मेत्यादिषु

श्री
भा०
९५

हतपाप्मत्वं हि अपहतकर्मत्वं कर्मवश्यतागन्धरहितत्वं तद्धर्मः कर्माधीनसुखभागित्वेन कर्मवश्या हि
जीवाः अतोऽपहतपाप्मत्वं जीवाद्व्यावृत्तस्य परमात्मन एव धर्मः तत्स्वैकस्वरूपोपाधिकं लोकानामी
शत्वं सत्यसंकल्पत्वादिकं सर्वभूतान्तरात्मत्वं चास्यैव धर्मः यथाह एष आत्मापहतपाप्मा विजरो वि
मृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इति तथा एष सर्वभूतान्तरात्मापहतपा
प्मा दिव्यो देव एको नारायण इति सोऽकामयत बहु स्यां प्रजायेयेत्यपि सत्यसंकल्पत्वपूर्वकं समस्तवि
श्वचिदचित्सृष्टियोगानिरुपाधिकभयाभयदेतृत्वं वा ज्ञानस्य परिमितत्वकृतपरिच्छेदरहितानवधि
कातिशयानन्दयोगश्चेत्यादयो कर्मसंपाद्याः स्वाभाविकाः धर्माः जीवस्य न संभवन्ति यत्तु शरीर
संबन्धाज्जीवानां तिरोहितमुक्तं तदयुक्तं नहि अशरीरत्वं कर्मवश्यतां साधयति सत्यसंकल्पस्येच्छो
पाधिशरीरसंबन्धसंभवात् अपि च शरीरं नाम त्रिगुणात्मकप्रकृतिपरिणामरूपं तत्संबन्धा
तः तत्तद्बन्धस्यापहतपाप्मनः सत्यसंकल्पस्य पुरुषस्येच्छया न संभवति अपुरुषार्थत्वात् कर्मव
श्यस्य तु स्वस्वरूपानभिज्ञस्य कर्मानुगुणफलभोगार्थानि कृतोऽपि तत्संबन्धोऽवर्जनीय इति
स्यादेतदेवं यदि त्रिगुणमयप्राकृतोऽस्य देहः स्यात् स तु स्वाभिमतस्वानुरूपोऽप्राकृत एवेति सर्व ९५
मुपपन्नं एतदुक्तं भवति परस्यैव ब्रह्मणो निखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपतया

रमात्मेति किं युक्तं उपचितपुण्यो जीव एवेति कुतः सशरीरत्वप्रसङ्गात् शरीरसंबन्धो हि जीवानामेव संभवति कर्मानुगुणप्रियाप्रियभोगायतने शरीरसंबन्धः अत एव हि कर्मसंबन्धरहितस्य मोक्षस्य प्राप्यत्वं अशरीरत्वेनोच्यते न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति संभवति च पुण्यातिशयात् ज्ञानाधिक्यात् जगदाधिपत्यं च अत एव लोककामेशत्वादि न दोषोपपद्यते नन्वेवं चोद्यास्यत्वं च फलदायित्वं च पापनयराकरत्वेन भावेनापि योगितं च मन्त्रेषु श्रूयते उपचितपुण्याः केचित् ज्ञानानन्दयात्मादिभिरधिकतं इष्यन्ते ततश्च सिद्धोपवादयस्तु रा:६
तस्मादेवात्मत्वश्रवणात् अतो ब्रह्मादिषु अन्यतम एव एकस्मिन् कल्पे उपचितपुण्यविशेषो हि उपभुतेभ्य ऐश्वर्यः जगत्सृष्ट्याद्यधिकारीति जगत्कारणत्वं जगदन्तरात्मत्वादि वाक्यमस्मिन्नेवोपचितपुण्यविशेषे सर्वज्ञे सर्वशक्तौ वर्तते अतोऽनतिरिक्तः परमात्मा नाम कश्चिदस्ति एवं च सत्यसंकल्पत्वमनन्यसमत्वं सर्वेश्वरत्वादयो जीवान्तरस्य एव सन्तु रूपाभिप्राया भवेति मोक्षशास्त्रमपि तत्स्वरूपतत्प्राप्त्युपायोपदेशपराण्येवेत्यवशाने विधीयते अन्तस्तद्धर्मोपदेशात् अन्तरादित्ये अन्तरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव कुतः तद्धर्मोपदेशात् जीवेष्वसंभवन्तस्तस्मैव परमात्मनो धर्मो अपहतपाप्मत्वादिः सर्वभूतेभ्यः पाप्मभ्य उदित इति उपदिश्यते अय उद्गतपाप्मा

श्री
भा°
२६

त्मनः प्राकृतदेहग्रहणं न प्राकृतदेहयद्देहसंबंधं न तत्कृतकर्मबंधनात्संबंधं च प्रतिविध्य कल्याणगुण
तकल्याणरूपं च वदति तदिदं स्वाभाविकमेव रूपमसुयात्मकानुग्रहेण तत्प्रतिपं नमणाकारं देव
मनुष्यादिसंस्थानं करोति स्वेच्छयैव परमकारुणिको भगवान् तदिदमाह प्रकृतिः अजायमानो
बहुधा विजायत इति सर्वात्मना भवोपि सन् तथा आत्मना नामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय
संभवाम्यात्ममायया परित्राणाय साधूनां विनाशाय च दुःकृतामिति साधवो मुपाद्य कास्तत्परि
त्राणमेवोद्देश्यं आनुषंगिको दुःकृतां विनाशः संकल्पमात्रेण विनाशयपते: प्रकृतिं स्वामिति
प्रकृतिः स्वभावः स्वमेव स्वभावमास्थाय न संसारिणां स्वभावमित्यर्थः आत्ममाययेति स्वसंकल्प
रूपेण ज्ञानेनेत्यर्थः मायावयुनं ज्ञानमिति ज्ञानपर्यायमपि माया शब्दं नैघंटुका अधीयते
आह च भगवान् पराशरः समस्ताः शक्तयश्चैताः नृप यत्र प्रतिष्ठिताः तद्विश्वरूपवैरूप्यं रूप
मन्यद्धरेर्महत् समस्तशक्तिरूपाणि तत्करोति जनेश्वरः देवतिर्यङ्मनुष्याख्यचेष्टावंति स्व
लीलया जगतामुपकाराय न सा कर्मनिमित्तजेति अस्यावतारस्याप्राकृतत्वमुच्यते म
हाभारतेपि न भूतसंघसंस्थानो देहोस्य परमात्मन इति अतः परस्यैव ब्रह्मणः एवं रूपत्वादय
मपि तस्यैव धर्मः अतश्चादित्यमण्डलाद्यधिकरणादित्यजीवव्यतिरिक्तः परमात्मैव स्रो मेद

सकलेतरविलक्षणस्वाभाविकानवधिकातिशयासंख्येयकल्याणगुणगणाश्च सन्ति तद्देवता
भिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौगन्ध्यसौन्दर्यसौकुमार्य
लावण्ययौवनाद्यनन्तकल्याणगुणगणनिधिदिव्यरूपमपि स्वाभाविकमस्ति तद्देवोपासकानुग्र
हेण तन्मूर्तिपञ्चकरूपमसौ स्थानं करोति अपारकारुण्यसौशील्यवात्सल्यौदार्यजलनिधिनिरस्त
निखिलहेयगन्धो यस्त्वयाप्यपरमात्मा परब्रह्मपुरुषोत्तमो नारायण इति यतो वा इमानि भूतानि
जायन्ते सदेव सोम्येदमग्र आसीदात्मा वा इदमेक एवाग्र आसीदेको ह वै नारायण आसीन्न ब्र
ह्मा नेशानः इत्यादिषु निखिलजगदेककारणतयावगतस्य परस्य ब्रह्मणः सत्यं ज्ञानमनन्तं ब्रह्म वि
ज्ञानमानन्दं ब्रह्मेत्यादिषु एवंभूतस्वरूपमिति व्यवगम्यते निर्गुणं निरञ्जनमपहतपाप्मा विजरो वि
मृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः न तस्य कार्यं करणं च विद्यते न
तत्समश्चाभ्यधिकश्च दृश्यते पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च तमीश्व
राणां परमं महेश्वरं तं देवतानां परमं च दैवतं स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनि
ता न चाधिपः सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाभिवदन् यदास्ते वेदाहमेतं पुरुषं
महान्तं आदित्यवर्णं तमसः परस्तात् सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधीत्यादिषु परस्य ब्र

इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्या-
श्री
भ्यो ज्यायानाकाशः परायणमिति तत्र संदेहः किं प्रसिद्धाकाश एव वा आकाशशब्देनाभिधीयते उतोक्त-
भा २१
लक्षणमेव ब्रह्मेति किं प्राप्तं प्रसिद्धाकाश इति कुतः शब्देन समधिगम्यत्वस्तनिपरे वार्थो व्युत्पत्तिसिद्धः
शब्देन प्रतीयते स एव ग्रहीतव्यः अतः प्रसिद्धाकाश एव चराचरभूतजातस्य कृत्स्नस्य कारणं अतस्त-
स्मादनतिरिक्तवस्तु ननु श्रुतिपूर्वकस्य स्यादित्यभिरुचेतनाज्ञेया वायुतिरिक्तब्रह्मण्युक्ते मुक्तं वितत्
न यथा हि यतो वा इमानि भूतानि जायन्ते तद्ब्रह्मेत्युक्ते कुत इमानि भूतानि जायन्त इत्यादि विशेषाकांक्षा-
यां सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इत्यादिना विशेषप्रतीतेर्जगज्जन्मादिकारण-
96
माकाश एवेति निश्चिते सदेव सोम्येदमग्र आसीदित्यादिषु सदादिशब्दाः साधारणाः आकाशस्तमेव
विशेषमाकाशमभिदधति आत्मा वा इदमेक एवाग्र आसीदित्यादिषु परिज्ञातमशब्दस्तत्रैव वर्तते
तस्यापि हि चेतनैकान्तत्वं न संभवति यथा सदात्मको यदस्ति आप्नोतीति आत्मा इति व्युत्पत्त्या ततरा-
माकाशोऽप्यात्मशब्दो वर्तते अत एवमाकाश एव कारणं ब्रह्मेति निश्चिते सति ईक्षणादयस्तदेवगुणा
गौणा वर्णनीयाः यदि हि साधारणशब्दैरेव सदादिभिः कारणमभ्यधायिष्यत तदा ईक्षणादयो- २१
तरोधेन चेतनविशेषस्यैव कारणत्वमिति निरदेक्ष्यत आकाशशब्देन तु विशेष एव निश्चितः इति ना

ब्रवेदेवमाम्नायः षष्ठी आदित्यादिजीवेभ्यो भेदो व्यपदिश्यते अस्य परमात्मनः य आदित्ये तिष्ठन्
आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति य आत्मनि तिष्ठन्
आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति यस्याक्षरं शरीरं यमक्षरं
न वेद यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा
दिव्यो देव एको नारायण इति चाप्यपहतपाप्मनः परमात्मनः सर्वान् जीवान् शरीरत्वेन व्यपदि
श्यतेऽपि मन्त्रस्तत्त्वेनैनं व्यपदिशति अतः सर्वेभ्य एवादित्यादिजीवेभ्योऽन्य एव परमात्मेति
सिद्धं यतो वा इमानि भूतानि जायन्त इति जगत्कारणत्वेनावगम्यते किं तज्जगत्कारणमित्य
पेक्षायां सदेव सोम्येदमग्र आसीत् तत्तेजोऽसृजत आत्मा वा इदमेक एवाग्र आसीत् स इमाँल्लो
कानसृजत तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इति साधारणो यः शब्दो जगत्कारणे निर्दिष्टे
२आ देवताविशेषं नेदं विशेषणरूपविशेषार्थस्वभावात्प्रधानदेवतादिव्यतिरिक्तं ब्रह्मेत्युक्ते इ
दानीमाकाशादिविशेषशब्दैर्निर्दिष्टजगत्कारणं तद्यादि वा देवता आकाशादिशब्दाभिधेयं तत्प्रति
ह्नविरचितत्रवुमान्त्रविस्तरमुक्तोत्तणामेव ब्रह्मेति शब्दतिपादने आकाशस्तल्लिङ्गादित्यादिना प्र
दर्श्यते षष्ठी [illegible] प्रतीतिरित्याकाश

श्री॰ भा॰ ९८ प्रसिद्धवन्निर्देशात् प्रसिद्धवन्निर्देशो हि प्रमाणान्तरप्राप्तिमपेक्षते प्रमाणान्तराणि च सदेव सोम्येदमग्र आसीदित्ये
वमादिवाक्यानि तानि च यथोदितप्रकारेणैव ब्रह्म प्रतिपादयन्तीति तत्प्रतीत्या हि तत्र आकाशशब्देन प्रसिद्धव
न्निर्दिश्यते संभवति च परस्य ब्रह्मणः प्रकाशकत्वादाकाशशब्दाभिधेयत्वं आकाशते आकाशयति चेति
किं चानेनाकाशशब्देन विशेषसमर्पणात् तमेनापि चेतनांशं प्रत्यसंभावितकारणभावं चेतनविशेषमपि म८
दधानेन तदैक्षत बहु स्यां प्रजायेयेति सोऽकामयत बहु स्यां प्रजायेयेतीत्यादिवाक्यशेषावधारितसार्वज्ञ
सत्यसंकल्पादिविशिष्टार्थप्रतिपादनसमर्थवाक्यार्थान्यथाकरणं न प्रमाणपदवीमधिरोहति
एवमपूर्वानं तविशेषणविशिष्टार्थप्रतिपादनसमर्थानेकवाक्यगतिसामान्यं चैकेनाच्चवादरू
पेणान्यथाकर्तुं न शक्यते यत्रात्मशब्दप्रत्ययेनानेकान्तो न संभवति सदात्मको यदः इत्यादिसूदर्शनादित्य
तं तत्रोच्यते यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयुज्यते तथापि शरीरप्रतिसंबन्धिन्यात्मशब्दप्र
प्रयोगप्राचुर्यादात्मा वा इदमेक एवाग्र आसीदात्मन आकाशः संभूत इत्यादिषु शरीरप्रतिसंबंधी चेतन
एव प्रतीयते यथा गोशब्दस्यानेकार्थवाचित्वेपि प्रयोगप्राचुर्यात् सास्नादिमानेव स्वतः प्रतीयते अयं ९८
न प्रतीतिस्कन्तजदसाधारणनिर्देशापेक्षा तथा स्वतः शरीरप्रतिसंबंधिचेतनाभिधानमेवम
ऐक्षत लोकान्नु सृजा इति सोऽकामयत बहु स्यां प्रजायेयेत्यादिततत्त्वाकाशोऽप्येवं स्थिरीकुर्वंति एवं

ध्यत्वाभाव्यान्निर्गुणत्वान्नेति तथा नित्यत्वम् आकाशस्य संभवतः इत्याकाशस्यापि कार्यत्वं प्रतीयते सत्यं सर्वेषामे
वाकाशवाय्वादीनां सूक्ष्मावस्था स्थूलावस्था चेति च स्यात् द्व्यमात्रिं तत्राकाशस्य सूक्ष्मावस्था कारणं स्थूला
वस्थात्तु कार्यं आत्मनः आकाशः संभूत इति यस्मादेव सूक्ष्मात्स्यात्तत्वं स्थूलरूपः संभूत इत्यर्थः स
र्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति सर्वस्य जगतस्त्वाकाशादेव प्रभवाप्ययादिश्रव
णात्केवलं तत्कारणत्वं ब्रह्मेति निश्चितं यत एव प्रसिद्धाकाशादन्यतिरिक्तं ब्रह्म अत एव यदेव आकाशानं
दो न स्यात् आकाशो ह वै नामरूपयोर्निर्वहितेति ते यदन्तरा तद्ब्रह्मादिनिर्देशोप्युपपन्नः अतः प्रसिद्धाकाशादन्यतिरि
क्तं ब्रह्मैवेदं आकाशपदवाच्यम् यो आकाशस्तल्लिङ्गात् यो आकाशशब्दाभिधेयप्रसिद्धाकाशादचेतनादर्थान्तरभू
तोयचोक्तलक्षणः परमात्मैव कुतः तल्लिङ्गात् निखिलजगदेककारणत्वं सर्वस्मात्ज्यायस्त्व परायणत्वमि
त्यादीनि परमात्मलिंगान्युपलभ्यन्ते निखिलकारणत्वं प्रविष्टस्य तु प्रसिद्धाकाशशब्दाभिधेयस्य नोप
पद्यते चेतनवस्तुनस्तत्कार्यत्वासंभवात् परायणत्वं च चेतनानां परमप्राप्यत्वं तच्चाचेतनस्य हेयस्य स
कलपुरुषार्थविरोधिनो न संभवति सर्वस्मात्ज्यायस्त्वं च निरुपाधिकं सर्वैः कल्याणगुणैस्सर्वेभ्यो नि
रतिशयोत्कर्षः तदप्यचितो नोपपद्यते यदुक्तं जगत्कारणविशेषाकांक्षायाम् आकाशशब्दे न विशेषसमर्प्य
णा इत्युक्तं तन [illegible] काशादेव समुत्पद्यन्त इति

श्री
भा
९९

यते छांदोग्ये अथयदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं
वावतद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति श्रूयते किमयं ज्योतिश्शब्दनिर्दिष्टो निरतिशयदीप्तियुक्तो
ऽर्थः प्रसिद्धमादित्यादिज्योतिरेव कारणभूतं ब्रह्म उत समस्तचिदचिद्वस्तुजातविसजातीयः समस्तका
रणभूतोऽखिलतया सर्वज्ञः सत्यसंकल्पः पुरुषोत्तम इति किं युक्तं प्रसिद्धमेव ज्योतिरिति कुतः प्रसिद्ध
वन्निर्देशो ह्याकाशप्राणादिवत्तद्वाक्ये परमात्मव्याप्तलिंगादिशोभादर्शनात् परमपुरुषप्रत्यभि
ज्ञानासंभवात् कौक्षेयज्योतिषैक्योपदेशात् प्रसिद्धमेव ज्योतिः कारणत्वव्याप्तमिति प्राप्ते दीप्तियो ,
गाज्जगत्कारणं ब्रह्मैवेत्येवं प्राप्ते प्रचक्ष्महे ज्यो ज्योतिश्चरणाभिधानात् ज्यो द्युसंबंधितया निर्दिष्टं निर
तिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव कुतः पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्यस्यैव
द्युसंबंधिनः चरणत्वेन सर्वभूतानामभिधानात् एतदुक्तं भवति यद्यपि अथ यदतः परो दिवो ज्योति
र्दीप्यत इत्यस्मिन् वाक्ये परमपुरुषासाधारणलिंगं नोपलभ्यते तथापि पूर्ववाक्ये द्युसंबंधितया पर
मपुरुषनिर्देशादिदमपि द्युसंबंधि ज्योतिस्स एवेति प्रत्यभिज्ञायत इति कौक्षेयज्योतिषैक्योपदेशाच्च
फलाय तदात्मकत्वानुसंधानविधिरिति न कश्चिद्दोषः कौक्षेयज्योतिषस्तदात्मकत्वेन भगवता ह्य ९९
यमेवोक्तः अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित इति छंदोभिधानान्नेति चेन्न तथा चेतोर्प

वाक्यशेषावधारितानन्यसाधारणानेकाश्चर्यविशिष्टं निखिलजगदेककारणं सदेव सोम्येदमग्र आ-
सीदित्यादिवाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत्सर्वाणि ह वा इमानि भूतानीत्यादिवाक्येन निर्दि-
श्यत इति सिद्धं ॥ श्री ॥ अतएव प्राणः ॥ श्री ॥ इदमाम्नायते छांदोग्ये प्रस्तोतर्या देवता प्रस्तावमन्वायत्ते-
ति प्रस्तुत्य कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविश-
न्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यपतिष्यदिति ॥ अ-
त्र प्राणशब्दोप्याकाशशब्दवत्प्रसिद्धप्राणव्यतिरिक्ते परस्मिन्नेव ब्रह्मणि वर्तते तदसाधारणनि-
खिलजगत्प्रवेशनिःक्रमणादिलिंगात्प्रसिद्धवन्निर्दिष्टात्। अधिकाशंका तु कृत्स्नभूतजातस्य
प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात्प्रसिद्ध एव प्राणो जगत्कारणतया निर्दिश्यत इति। परिहा-
रस्तु शिलाकाष्ठादिष्वचेतनेषु चेतनत्वे च तदभावात् सर्वाणि ह वा इमानि भूतानीति परं ब्रह्मैव प्राण-
शब्देनाभिधीयते अतः प्रसिद्धाकाशप्राणादेरन्यदेव निखिलजगदेककारणमपहतपाप्मत्वस-
र्वज्ञत्वसत्यसंकल्पत्वाद्यनंतकल्याणगुणगणं परं ब्रह्मैवाकाशप्राणादिशब्दाभिधेयमिति सिद्धं
अतः परं जगत्कारणत्वव्याप्तेन केनापि निरतिशयोत्कृष्टगुणेन ज्योतिरिन्द्रादिशब्दैर्यत्तत्प्र-
सिद्धैरप्यभिधीयमानं परं ब्रह्मैवेति निरूप्यते ॥ श्री ॥ ज्योतिश्चरणाभिधानात् ॥ श्री ॥ इत्यादि इदमाम्ना

प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहत

श्री२

श्री॰
भा॰
१००

ऽस्य भावे केनचित्संनिहितायां विरोधात् यथा वृक्षाग्रे श्येनो वृक्षाग्रात्परतः श्येन इति तस्मात्परमपुरु
ष एव निरतिशयतेजस्को दिवः परो ज्योतिर्दीप्यत इति प्रतिपाद्यते एतावानस्य महिमा अतो ज्यायां
श्च पुरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति प्रतिपादितस्य च तस्य परमपुरुषस्य वे
दाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसस्तु पारे इत्यत्राभिहिताप्राकृतरूपस्य तेजोऽप्राकृतमिति
तद्रूपमप्येवं ज्योतिःशब्दाभिधेयं यतो निरवद्यं निरतिशयदीप्तियुक्तं ज्योतिः परब्रह्मणि यं प्रसिद्ध
वन्निर्दिष्टं परमपुरुष एवेत्युक्तं इदानीं कारणत्वाशास्त्रतत्वप्राप्युपायतयोपास्यत्वेन श्रुतं इन्द्रप्रा
णशब्दाभिधेयोऽपि परमपुरुष एवेत्याह । प्राणस्तथानुगमात् । कौषीतकीब्राह्मणे प्रतर्दन
विद्यायां प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च तं हेन्द्र उवाच प्रतर्दन वरं वृणीष्वे
ति वक्तारं इन्द्रं प्रति त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति प्रतर्दनोक्तः स होवाच प्राणो
ऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति श्रूयते तत्र संशयः किमयं हिततमोपासनकर्मतया
इन्द्रप्राणशब्दनिर्दिष्टो जीव एव उत तदतिरिक्तः परमात्मेति किं युक्तं जीव एवेति कुतः इन्द्रशब्दस्य
जीव एव प्रसिद्धेः तत्समानाधिकरणस्य प्राणशब्दस्यापि तत्रैव वृत्तेः अयमिन्द्राभिधानो हि जीवः १००
प्रतर्दनेन त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इत्युक्तः मामुपास्स्वेति स्वात्मोपासनं हि

हिततमत्वेनो
पदिष्टवान् २

९९

णनिगमात्तथाहिदर्शनं सू० पूर्वस्मिन्वाक्ये गायत्री वा इदं सर्वमिति गायत्र्याख्यं छंदोभिधीयते न तेन
दृचाभ्युक्तमित्युदाहृतायां तावानस्य महिमा इत्यस्यामृचोपि छंदोविषयत्वान्न परमपुरुषा
भिधानमिति चेन्न तथा चेतोर्पणनिगमात् तथा गायत्रीशब्देन छंदोमात्रमभिधीयते छंदोमा
त्रस्य सर्वात्मकत्वानुपपत्तेः अपितु ब्रह्मण एव गायत्रीचेतोर्पणमभिहितमिति गम्यते ब्रह्मणो गायत्री
मात्रसादृश्यानुसंधानफलायोपदिश्यते तस्य षड्विधं भवति च पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवी
ति चतुष्पद्ब्रह्म तच्चतुष्पदायाः गायत्र्याः सादृश्यं चतुष्पदा च गायत्री क्वचिन्न दृश्यते तथा
इंद्रः प्राचीपतिर्वृत्रेण पीडितः इत्यत्र च नामत्वासमन्तसादितिरिति तथान्यत्रापि सादृश्यमात्रेण छं
दोभिधायी शब्दोऽन्यार्थे प्रयुज्यमानो दृश्यते यथा संवर्गविद्यायां ते वा एते पञ्चान्ये पञ्चान्ये दश सन्त पा५
न्तत्पारभ्य सैषा विराडन्नादिरुच्यते इतश्च गायत्रीशब्देन ब्रह्मैवाभिधीयते सू० भूतादिपादव्यप
देशोपपत्तेश्चैवं सू० भूतपृथिवीशरीरहृदयानि निर्दिश्य सैषा चतुष्पदेति व्यपदेशो ब्रह्मण एव
गायत्रीशब्दाभिधेयउपपद्यते सू० उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् सू० पूर्ववाक्ये
त्रिपादस्यामृतं दिवीति दिवोधिकरणत्वेन निर्देशात् इह च दिवस्परत्वमवधित्वेन निर्देशादुपदे
शस्य भिन्नरूपत्वेन पूर्ववाक्योक्तं ब्रह्मात्र न प्रत्यभिज्ञायत इति चेन्न उभयस्मिन्नप्युपदेशे

नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव
श्री॰ भा॰ ९९ प्रज्ञात्मानंदोऽजरोऽमृत इति भूतमात्राशब्देनाचेतनवस्तुजातमभिधाय प्रज्ञामात्राशब्देन तदाधारत
या चेतनवर्गं चाभिधाय तस्याप्याधारतया प्रकृतं लिङ्गं प्राणशब्दाभिधेयं निर्दिश्य तमेवानंदोऽजरोऽमृ
त इत्युपदिशतीति तदेतच्चेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वं जीवादर्थान्तरभूते तस्मिन्परमात्मन्येवो
पपद्यत इत्यर्थः अध्यात्मसंबंधभूमा त्वस्मिन्परमात्मासाधारणधर्मसंबंधोऽध्यात्मसंबंधः
तस्य भूमा बहुलत्वमस्मिन्प्रकरणे हि दृश्यते तथा हि प्रथमं त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं म
100 न्यस इति मामुपास्स्वेति च परमात्मासाधारणमोक्षसाधनोपासनकर्मत्वं प्राणशब्दनिर्दिष्टस्येन्द्रस्य
प्रतीयते तथा एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत इति एष एवासाधु कर्म का
रयति तं यमधो निनीषतीति सर्वस्य कर्मणः कारयितृत्वं च परमात्मधर्मः तथा तद्यथा रथस्यारे
षु नेमिरर्पिता नाभावरा अर्पिता एवमेवैताः भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिता
इति सर्वाधारत्वं च तस्यैव धर्मः तथा स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इत्येतेऽपि परमात्मन एव ९९
धर्माः एष लोकाधिपतिरेष सर्वेश इति च परमात्मन्येव संभवति तदेवमध्यात्मसंबंधभूम्नोऽत्र
विद्यमानत्वात्परमात्मैवात्रेन्द्रप्राणशब्दनिर्दिष्टः कथं तर्हि प्रज्ञातजीवभावस्येन्द्रस्य स्वात्मन उपा

ततश्च [illegible] त्मानं तत्त्वमाश्रुयापयेवजगत्कारणोऽपि सतस्यैवात्मत्वं तत्त्वमस्याद्युपदे
शात्तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इत्युक्तत्वात् अतः प्रसिद्धजीवभावं प्रत्येवकारणं
ब्रह्मेत्यपशंकायामभिधीयते आत्मा न पाप्मापहत इत्यादिति अयमिद्द्भासणश्च निर्दिष्टोन जीवमात्र
प्रयितजीवादर्थान्तरभूतं परं ब्रह्म सत्यः आत्मा एव श्रुत्वात्मानं दोजरो मृत्युरिती इन्द्रप्राजापत्यप्राम्भा
प्रस्तुतस्यानंदोजरामृत्युत्वात्सामान्ताधिकरणेन नान्यथागतेर्हि तथा सत्यवोपपद्यते भूयो नत्व
जरामृत्योपदेशादिति चेदुपाजीमवेप्रभवारात्मिनत्वाद्यपदेशे इत्युपाजापत्ये निर्दिष्टस्यानंदो
जरामृत्युत्वे नैकार्थ्यादपवप्यदस्यरतिलजेपपद्यते मामेवविजानीहि प्राणोऽस्मि प्रज्ञात्मानं
मामायुरमृतमित्युपास्वेति वक्ता हीन्द्रस्त्रिशीर्षाणं त्वाष्ट्रमहनमित्येवमादिनात्मा एवमादिभिः प्र
ज्ञातजीवभावस्य स्वात्मन एवोपास्यतां प्रतर्दनायोपदिशति अतइत्युपक्रमे जीवविशेषस्यैव
गम्यते प्रत्यात्मानंदोजरो मृतत्वात्मादिभिरुपसंहारस्तदनुगुणतयैव वर्णनीयमिति चेत्परिहरति
प्रधानात्मसंबंधभूमात्यास्मिन आत्मनियः संबंधः सोध्यात्मसंबंधः [illegible]
[illegible] तस्यभूमात्मत्वे वाक्त्वमित्यर्थः आत्मन्याधेयतयासंवध्यमानानां
वक्तृत्वं तत्संबंधवक्तृत्वं तत्त्वास्मिन्वक्तरिपरमात्मन्येव हि संभवति तथाप्युपस्थारेणेनैभिरर्थिता

तत्संबुद्ध्यात्मन्येन्दु त्वमित्यर्थः

वां

सएवाहमवस्थितः स्रष्टाः सर्वमहं सर्वं मयि सर्वं सनातनं इत्यादि अस्मिन्प्रकरणे जीववाचिभिश्शब्दैर्विदि
श्री० षोपास्याभिधायिभिश्चोपास्यभूतस्य ब्रह्मणोऽभिधाने कारणं चोद्यपूर्वकमाह श्री जीवमुख्यप्राणलिं
भा० ङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् श्री न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादौ
१०२ णत्वा छूमहन्नमहन्मुखोन्युतीनृणात्यादिकेभ्यः भापक्रेश्यादिजीवलिंगात् यावदस्मिन्शरीरे प्रा
णो वसति तावदायुः अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति मुख्यप्राणलिंगा
च्चनाभ्यामसंबंधमुक्तेति चेन्न उपासात्रैविध्याद्धेतोः उपासनात्रैविध्यमत्रोपदेष्टुं तत्तच्छब्दैरभिधानं
निखिलकारणभूतब्रह्मणः स्वरूपेणानुसंधानं भोक्तृवर्गशरीरकत्वानुसंधानं भोग्यभोगोपकर
णशरीरकत्वेनानुसंधानं चेति त्रिविधमनुसंधानमुपदेष्टुमित्यर्थः तदिदं त्रिविधं ब्रह्मानुसंधानं
प्रकरणान्तरेष्वाश्रितं सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मेत्यादिषु स्वरूपानुसंधानं तत्सृष्ट्वा तदेवानुप्रा
विशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चावि
ज्ञानं च सत्यं चानृतं च सत्यमभवदित्यादिषु भोक्तृशरीरतया भोग्यभोगोपकरणशरीरतया चानु
संधानं इहापि प्रकरणे त्रिविधमनुसंधानं युज्यत एवेत्यर्थः एतदुक्तं भवति यद्यपि गर्भादिजीववि १०२
शेषाणां प्रकृत्यायचे तत्तद्विशेषाणां च परमात्मासाधारणधर्मयोगः तदभिधायिनां शब्दानां

५१ स्यतौ हि शास्त्रसंगतत्वमाह. श्री प्राणात्मत्वे श्रीवामदेववत् श्री अज्ञातजीवभावेनेदं नामासेव
विजानीहि मामेवोपास्स्वेति उपास्यत्वलक्षणः स्वात्मत्वेनोपदेशोऽयं तत्प्रमाणान्तरमानन्दात्मावेलोकान्तः
तः अपितु शास्त्रेण स्वात्मदृष्टिकृतः अहमात्मभवति अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याक
रवाणि एतदात्म्यमिदं सर्वं अंतः प्रविष्टः शास्ता जनानां सर्वात्मायः आत्मनि तिष्ठन्नात्मनोऽन्तरो यमा
त्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः यश्चात्मनि संचरन् यस्या
त्मा शरीरं यमात्मा न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः इत्येवमादिशा
कं स्त्रेण जीवात्मशरीरं परमात्मानमवगम्य जीवात्मवाचिनाहं त्वमादिशब्देनापरमात्मन्येव प
र्यवसानं तत्त्वमामेव विजानीहि मामुपास्वेति स्वात्मशरीरं परमात्मानमेवोपास्यत्वेनोपदिशति
वामदेववत् यथा वामदेवः परस्य ब्रह्मणः सर्वान्तरात्मत्वं सर्वस्य तच्छरीरत्वं शरीरवाचिनां शब्दा
नां शरीरिणि पर्यवसानं पश्यन् अहमिति स्वात्मशरीरकं परं ब्रह्म निर्दिश्य तत्सामानाधिकर
ण्येन मनुसूर्यादीन् व्यपदिशति तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं
कक्षीवानृषिरस्मि विप्र इत्यादि यथा वामदेव इति प्रसिद्धोऽर्थः सोऽब्रवीत् अहमेकः प्रथममासं व
र्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादिवत् [illegible] सर्वगतत्वादनेनास्य

यं ब्रह्मेति लक्षणवाक्यवादानुमानिकप्रधानादर्शनान्तरभूतेन विशेषण एवेत्युपवदामः सच स्वाभा
श्री॰ विकानवधिकातिशयानन्दवियन्निमित्तिलचेतनभेदाभेदेत्ननसत्यसंकल्पत्वसमस्तचेत
भा॰ नाचेतनात्मत्वादिभिर्वृहत्त्वेन भूयात्वस्याज्जीवप्रधानाभिलपनीयाज्ञाधीनतरत्नतः इति च समाव
१-२ धीमहि सर्वाश्रयकर्तृकर्मनिमित्तत्वासाधारणादिभिः तदुदेरि कथाकाशप्राणायचेतन २।७
विशेषाभिधायिभिर्जगत्कारणतया प्रसिद्धवचिहिदिश्यमानः सकलेतरचेतनाचेतनविल
क्षणः स एव तिसमनन्तरित्याह्निपरेतत्वासाधारणा निरतिशयदीप्तियुक्तज्योतिः शब्दाभिधेयत्वोक्ते
नि) संबंधितया प्रत्यभिज्ञानात्स एवेत्यां परमह्निपरमकारणासाधारणाप्रत्नत्वप्राप्तिहेतुभूतः परम
102 पुरुषएवप्रणस्त्वद्दृष्टाङ्गादिशब्दैरभिधीयनेत्यत्र मदितदेवमति। सकलेतरप्रमाणसंभावनाभू पतिनर्दे
मिः सार्वज्ञसत्यसंकल्पत्वाद्यपरिमितोदारगुणसागरतया स्वेतरसमस्तवस्तुविलक्षणः परंब्रह्मपुरुषो
त्तमो नारायणः एव वेदान्तवेद्य इति युक्तमेतन। परह्निनीपतनीयचतुर्थषष्ठपादेषु यद्यपि वेदान्तवेद्यब्रह्म
वतत्त्वादिकानि चितवेदान्तवाक्यानि प्रधानतेष्ठस्तात्पर्य तत्त्वविशेषस्वरूपप्रतिपादनपराणि तथा
शाक्यतंत्रेरसनमुखे नततत्त्वाकोदितकल्याणगुणाकरत्वेनाप्रतिपाद्यते तेनास्य पृष्टजीवलिंगका १-२
निवाक्यानि द्वितीयविचार्यतेस्य ष्टलिंगकानि तृतीयतत्पाति पादनछायानुसारीणि च तर्थे ...

रमात्मनाविप्रावरत्वमानाधिकरण्यवादश्चपतेन जपरमात्मन स्तनव्विदचिद्विशेषान्तरात्मत्वान्नुसंधा
नेअस्तिरियादपि विवेतमिति अतो ब्रह्मशब्दाद्विनिर्दिष्टो जीवादर्थान्तरभूतः परमात्मेति सिद्धं
श्री इति श्रीभगवद्रामानुजाचार्यैः श्रीभाष्ये वेदान्तार्थविरचिते शारीरकमीमांसाभाष्ये प्रथम
स्याध्यायस्य प्रथमः पादः ॥ श्री श्री श्री श्री श्रीमते रामानुजाय नमः श्रीप्रथमे पादे अधीतवेदः
पुरुषः कर्ममीमांसाश्रवणाधिगतकर्मयाथात्म्यविज्ञानः केवलकर्मणामल्पास्थिरफलत्वमवे
गम्य वेदान्तवाक्येषु च आपातप्रतीतानन्तस्थिरफलब्रह्मस्वरूपतदुपासनसमुपजातपरमपुरु
षार्थलक्षणमोक्षापेक्षो यथावस्थितपरिनिष्पन्नवस्तुबोधनशक्तिः वेदान्तवाक्यानां परस्मिन्
ब्रह्मणि निश्चितप्रमाणभाव इति कर्मब्रह्मरूपशारीरकमीमांसाश्रवणमारभेतेत्युक्तं
शास्त्रारंभसिद्धये अनन्तविचित्रस्थिरत्रसरूपभोक्तृभोग्यभोगोपकरणभोगस्थानलक्षणनि
खिलजगदुदयविभवलयमहानन्दैककारणं परं ब्रह्म यतो वा इमानीत्यादिवाक्यं बोधयतीति
च प्रतिपादितं जगदेककारणं परं ब्रह्म सकलेतरप्रमाणाविषयत्वं शास्त्रैकप्रमाणकमित्यभिधा
नेन शास्त्रप्रमाणकत्वे ब्रह्मणः प्रवृत्तिनिवृत्त्यन्वयविरहेऽपि स्वरूपेणैव परमपुरुषार्थभूतेऽस्मि
न्ब्रह्मणि वेदान्तवाक्यानां समन्वय... कारणतया वेदान्त

श्री· भा· १·४

रसत्वात्स्ते भवंति न चक्षुरादयः स्वेनापि वाचामनसा त्वविशुद्धेन तथा प्राणस्य प्राणः प्रथम खलु प्राण
एव प्रस्तात् देहशरीरं प्रविश्य चेष्टापयति सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राण
मभ्युज्जिहते इत्यादिषु मनोमयत्वे विशुद्धेन मनसा ग्राह्यत्वं प्राणशरीरत्वं सर्वस्याधारत्वं नियंत्र प्राणस्याऽ
२४ त्वं च एवं सर्वस्येश्वरत्वान्तर्हृदयेंतर्हृत्स्थेति न ब्रह्मशब्दोऽपि प्रत्यय एवं भवति स प्राणो ह्यमना इति मन आप
तं ज्ञानं प्राणं प्रवृत्तिं स्थितिं च ब्रह्मणो निवेपति स्पष्टं सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत
त्यत्रोपासने विधीयते सर्वात्मकं ब्रह्म ध्यानतः स क्रतुं कुर्वीतेति तस्यैव गुणोपादा
चौ नानुवादः उपादेयाच्छ्रयगुणानामतो मयत्वादयः अतः सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमु
पासीतेति वाक्यार्थः तन्मतभेदः किमिह ब्रह्मशब्देन प्रत्यगात्मा निर्दिश्यते उत परमात्मेति कि
युक्तं प्रत्यगात्मेति कुतः तस्यैव सर्वपदसामानाधिकरण्यान्निर्दिश्यमानत्वे सर्वशब्दनिर्दिष्ट
हि ब्रह्मादिस्तंबपर्यंतं कृत्स्नं जगत् ब्रह्मादिभावश्च प्रत्यगात्मनोऽनाद्यविद्यामूलकर्मविशे
षोपाधिकोऽविद्यत एव परस्य तु ब्रह्मणः सर्वज्ञस्य सर्वशक्तेरपहतपाप्मनो निरस्तसमस्तावि
द्यादिदोषगंधस्य समस्तहेयाकारसर्वभावो नोपपद्यते प्रत्यगात्मन्यपि ब्रह्मचिन्त्यचिद्ब्रह्मशब्दः प्र २४
प्रतं युज्यते एव परमात्मा परं ब्रह्मेति परमेश्वरस्य क्वचित्सविशेषणो निर्देशः प्रत्यगात्मन्यपि निर्दे

र्वत्र प्रसिद्धोपदेशात् इदमाम्नायते छांदोग्ये अथ खलु क्रतुमयोऽयं पुरुषो यथा क्रतुरस्मिंल्लोके पुरुषो
भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः इत्यादि अत्र संकल्पं कुर्वी
तेति प्रतिपादितस्योपासनस्योपास्यो मनोमयः प्राणशरीर इति निर्दिश्यमान इति प्रतीयते ब्रह्म वा
यः किं मनोमयत्वादिगुणकः शारीरः उत परमात्मेति किं युक्तं शारीर इति कुतः मनः प्राणयोः शरीरोप
करणत्वात् परमात्मनस्तु अप्राणो ह्यमना इति तन्निषेधात् न च सर्वं खल्विदं ब्रह्मेति पूर्वनिर्दिष्टं ब्रह्म गो
पास्यत्वात् यासेव इह श्रुत्या निर्दिश्यते उपासीनेत्युपासनोपक्रमत्वात् तिरिच्य पाययम्भ तद्ब्रह्मास्मि कस्योप
२१) देशापेयात् तान्तु न कुर्वीतेत्युपासनस्योपास्याकांक्षायां शारीरस्य मपि ब्रह्म सर्वस्य तदात्मत्वा
कांक्षेत्सवाक्यार्पितेन मनोमयत्वादिगुणकेनेति शंकायां नान्मनोमयप्राणशरीरत्वमन्यार्थे न
२५५ यानि दिशेत् विभक्तिपरिणाममपास्येनोपास्यकांक्षानिवृत्तिसिद्धेः एवं निश्चिते जीव एव तद्वाक्ये प्रति
रस्यब्रह्म परमपि जीव एव मुख्यार्थे प्रयुक्तमित्यवसीयत इत्येवं प्राप्ते ब्रूमः श्रीसर्वत्र प्रसिद्धोपदे
शात् मनोमयत्वादिगुणकः परमात्मैवोक्तः सर्वेषु वेदान्तवाक्येषु परमात्मन्येव ब्रह्मशब्दप्रसिद्धस्य मनो
मयत्वादेरुपदेशात् प्रसिद्धं हि मनोमयत्वादि ब्रह्मणः यथा मनोमयः प्राणशरीरनेता सन्धोत ५२
ईदृयाकाश ... CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham ... यरनेवि

श्री॰ भा॰ २०५ यत्र मनस्सर्वप्रकारं सर्वशरीरं सर्वात्मभूतं परं ब्रह्म शान्तो भूत्वा उपासीतेति श्रुतिरेव परस्य ब्रह्मणः स
र्वात्मकत्वमुपपाद्य तत्प्रयोपासनमुपदिशतीति परं ब्रह्म हि कारणावस्थं कार्यावस्थं च सूक्ष्मस्थूलचिद
चिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतमेवं भूततादात्म्यस्य प्रतिपादनेन परस्य ब्रह्मणः सकलहे
यप्रत्यनीककल्याणगुणाकरत्वं न विरुध्यते प्रकारभूतशरीरगतानां दोषाणां प्रकारिण्यात्म
न्यप्रसंगात्प्रत्युत निरतिशयैश्वर्यापादनेन गुणायैव भवतीति पूर्वमेवोक्तं यदुक्तं जीवस्य सर्व
तादात्म्यमुपपद्यत इति तदसत् जीवानां प्रतिशरीरभिन्नानामन्योन्यतादात्म्यासंभवात् स्व
रूपस्यानवच्छिन्नस्वरूपस्यापि जगत्तादात्म्यं जगज्जन्मस्थितिप्रलयकारणत्वं न संभवतीति
जगद्व्यापारवर्जमित्यत्र वक्ष्यते जीवकर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानामपवकारण
मित्यपि न साधीयः तत्कर्मनिमित्तत्वेपीश्वरस्यैव जगत्कारणत्वादतः परमात्मैवात्र ब्रह्मश
ब्दाभिधेयः इममेव सूत्रार्थमभियुक्ता मन्यन्ते सर्वं खल्विति सर्वात्मा ब्रह्मेति श्रीविवक्षित
श्री गुणोपपत्तेश्च वक्ष्यमाणाश्च गुणाः परमात्मन्येवोपपद्यन्ते मनोमयः प्राणशरीरो भारूपः २०५
सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर
इति मनोमयः परिशुद्धेन मनसैकेन ग्राह्यः विवेकविमोकादिसाधनसप्तकानुगृहीत

[illegible]वृत्तिकारः

104

कोपायोऽपेक्षितव्ये च वियते न चानन्यापेक्षत्वमिति चेत् ; अविद्यावत्त्वस्यैव कर्मनिमित्तत्वाज्जगज्ज

न्मस्थितिलयानां तज्जलानिति हेतुनिर्देशः युगपदयोगेन दृश्यमर्थमप्यर्जीवात्मास्वतो यदि क्रिय

नूपपन्नं ब्रह्मतः सम्यङ्नाम विभ यादेवत्ति येन ब्रह्म व्याख्यावशात्मनावतिष्ठ इति तेद्

सर्वगमपि हायतेरथात सर्वं खल्विदं ब्रह्मेति निर्दिष्टं सर्वस्मिन् जगति ब्रह्मशब्देन तदात्मनत्वाभि

धीयमानं परं ब्रह्मैकमन्यत्वगतमात्रतः प्रसिद्धोपदेशात् तज्जलानिति हेतुतः सर्वं खल्विदं ब्रह्मेति प नय

सिद्धवाक्यैर्हि यात ब्रह्मणो जातत्वात् ब्रह्मणि लीनत्वात् स्थापितजीवनत्वाच्चेह नोद्ग्राह्यात्मकं सर्वं ख

ल्विदं जगदिति सूक्ते यस्माज्जन्मस्थितिलयाद्वेदान्तेषु प्रसिद्धास्तदेवात्र ब्रह्मेति प्रतीयते न च परमेव

ब्रह्मतया हि यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजि

ज्ञासस्व तद्ब्रह्मेति ब्रह्म आनन्दो ब्रह्मेति व्यजानात् [illegible] आनन्दा [illegible] वख ध्येव

ल्विमानि भूतानि जायन्त इत्यादिना पूर्ववाक्येन प्रतिपादितानन्वाधिकातिशयानन्दयोगितो वि

याश्रितः परस्माद्ब्रह्मण एव जगदुत्पत्तिस्थितिलया निर्दिश्यन्तेऽत एवास्य कार [illegible] यान्तवान्यस्य

कश्चिज्जनिता न चाधिपः इति परं ब्रह्मैव कारणमुपदिश्यते ? एवं हि सर्वेषु परस्यैव ब्रह्मणः का

रणत्वं प्रसिद्धमतः परब्रह्मणो जातत्वात् ब्रह्मलीन [illegible] ता ब्रह्म प्राणानां तदात्मकत्वं यातादात्म्य

तुलिं कि

ई

सूत्रकारमतेनादृश्याभावात् आदृष्टरहितः अतएवावांश्रजल्पकः यदि सूर्योंस्वर्गीत्वादृष्टादिलेवप
श्री॰ र्यतंनिखिलंजगत्तृणीकृत्यजोपमासीनइत्यर्थः अतएतेगुणाः विवलिताः परमात्मन्येवोप
भा॰ पद्यंते श्रीअनुपदेनेत्यत्रजातिचः न मिमंगुणत्सागरंपश्यीलोचयतांस्वधोतकस्यस्यशरीर
२६ संबंधनिबंधनाधरिमिनइः स्वसंबंधयोग्यपञ्चवेहमकोंवस्यस्यजीवस्यपरस्तुतद्गुणलेशसंबंधो
पिनेत्यपयतयतिनास्मिन्नकारणेशारीरपरिग्रहशंकाजायतइत्यर्थः श्रीकर्मकर्तृस्थपदेनाव
एतस्मितः प्रेत्याभिसंभविताम्मीतिप्राप्यत्वत्यापरब्रह्मत्वमुपदिश्यतेप्राप्तृतयाचजीवः अतःप्रा
प्ताजीवउपासकः प्राप्यंपरब्रह्मोपास्यमितिप्राप्तृत्वादेवंवदमितिज्ञायते श्रीभावविशेषात् प्रथम
आत्मानंदेदयातिशारीरः अप्याप्तिनिर्दिष्टउपास्यत्वप्रथममयाएवंसमानप्रकरणेबाह्यजीवाचक्ष
वैशानुविषोपः सूपतेजीवपरयोः यथाव्रीहिर्वायवोवाश्यामाकोवाश्यामाकतण्डुलोवाएव
मयमंतरात्मनिपुरुषोहिरण्मयोयथाज्योतिरधूममिति अत्रांतरात्मनीतिसप्तम्यंतेनशा
रीरोनिर्दिश्यतेपुरुषोहिरण्मयइतिप्रथमयोपास्यःअतः परएवोपास्यः श्रीसर्वेषामेवनय
शारीरादन्यः सर्वस्यचाहंहृदिसन्निविष्टोमत्तः स्मृतिर्ज्ञानमपोहनंचयोमामेवमसम्मूढोजा २५
नातिपुरुषोत्तमंईश्वरः सर्वभूतानांहृद्देशेऽर्जुनतिष्ठतिभ्रामयन्सर्वभूतानियंत्रारूढानि

परमात्मोपासननिर्मलीकृतेन हि मनसा गृह्यते अनेन हेयप्रत्यनीककल्याणैकतानतया सकले
तरविलक्षणस्वरूपतोक्तेः मलिनमनोभिः नामेत्यग्राह्यत्वात् प्राणशरीरः जगति सर्वेषां प्रा
णिनां धारकः प्राणो यस्य शरीरं आपे पंचविधेयं प्राणभृत्त्वं सप्राणशरीरः आपे पञ्चविधेयस्व
शेषत्वानि शरीरस्यात्मप्रवृत्तिनिमित्तानि तु पर्यायव्यपदिश्यन्ते भारूपः भास्वरूपः अप्राकृतस्वासा
धारणनिरतिशयकल्याणदिव्यरूपत्वेन निरतिशयदीप्तियुक्त इत्यर्थः सत्यसंकल्पः अप्रति
हतसंकल्पः आकाशात्मा ... काशवत्सूक्ष्मस्वरूपः सकलेतरकारणभूतस्याकाशस्या
ते) त्मभूत इति वा आकाशात्मा स्वयं च प्रकाशते अन्यांश्च काशयतीति वा आकाशात्मा सर्वकर्मा क्रि
यत इति कर्म सर्वं जगद्यस्य कर्म स सर्वकर्मा सर्वा वा क्रिया यस्य सो सर्वकर्मा सर्वकामः काम्यन्त इति कामाः
भोग्यभोगोपकरणादयस्ते परिशुद्धाः सर्वविधा अस्य सन्तीत्यर्थः सर्वगन्धः सर्वरसः अशब्द
मस्पर्शमित्यादिना प्राकृतगन्धरसादिनिषेधात् अप्राकृताः स्वासाधारणा निरवद्या निरतिशयाः
कल्याणगुणाः स्वभोग्यभूताः सर्वविधा गन्धरसा अस्य सन्तीत्यर्थः सर्वमिदमभ्यात्तः इदं
सर्वपर्यन्तं सर्वं कल्याणगुणजातं स्वीकृतवान् अभ्यात्त इति भुक्तार्थे क्तः आहिताग्न्यादित्वात् कर्तरि क्तः
अवाक्यवाकः अवाकी वाक् उक्तिः सास्य नास्तीति अवाकी ... अनादर इति अवाप्तसम

श्री सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर इति जगदैश्वर्यं विशिष्टस्यात्व
भा ह्रपयस्तोत्कोपादेयान् प्रतिपादयन् एषम आत्मांतर्हृदये ऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाक
१०१ द्वा श्यामाकतंडुलाद्वेत्युपासकस्य हृदये ऽणीयस्त्वेनेनत्याकर्मनयो या स्वरूप परमपुरुषस्योपास्ना
ध्यमवस्थानमुक्त्वा एषम आत्मांतर्हृदये ज्यायान् पृथिव्या ज्यायानंतरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो
लोकेभ्यः सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मांतर्हृदये ऽवस्थितस्यो
पास्यमानस्य ज्यायस्त्वाकारं निर्दिश्य एषम आत्मांतर्हृदय एतद्ब्रह्मेत्येवंभूतं परब्रह्म परमकारुण्येनास्म
दुज्जिजीविषयास्मत् हृदये संनिहितमिति तदनुसंधाने विधायैतमितः प्रेत्याभिसंभवितास्मीति य
धोपासनं प्राप्तिनिश्चयानुसंधानं च विधाय इति यस्य स्यादद्धा न विचिकित्सास्तीति एवंविधप्राप्य वि६
आतो५ प्राप्तिनिश्चयवंतं तस्योपासकस्यैवं संशयो नास्तीत्युपसंहरति अत उपासनार्थमर्भकौकस्त्वमणीयस्त्व ५५
च संभोगप्राप्तिरिति चेन्न वैशेष्यात् । जीवस्येव परस्यापि ब्रह्मणः शारीरांतर्वर्तित्वमभ्युपगतं चे
त्तद्वदेव शारीरसंबंधप्रयुक्तसुखदुःखोपभोगप्राप्तिरिति चेन्न हेतुवैशेष्यात् न हि शारीरांतर्वर्ति १०१
त्वमेव सुखदुःखोपभोगहेतुः अपि तु पुण्यपापरूपकर्मपरवशत्वं तच्चापहतपाप्मनः परमात्म
नो न संभवति तथा च श्रुतिः तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति परमात्मा

मायया तमेव शरीरं लीलया गृहीत्वा ... मनपामस्मकं परमात्मानं चोपास्यं सस्तीति दर्शयति प्रीयर्थं
कोऽयं स्थानद्वयदेशः चेनेति चेन्न निचाय्यत्वादेवं व्योमवत् च आस्यापत्तेनस्वम मं कोकं तंत्वसपदे
शोः त्वव्यपदेशः एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा
वेत्यादिना अणीयस्त्वस्य स्थानव्यपदेशाच्च नायं परमात्मा अपि तु जीव एव सर्वगतस्य स्वल्पस्थ
दृतयोनीयं अपि प्रयंति पीठ स्थानादिभिः परमात्मनो व्यपदिक्कितत्वाव गमा उजीवस्य चाराग्रमात्र
को यदेशादिति चेत् तत्रैव परमात्मैव अणीयानिति सेवेति चाप्यत्वे व्यपदिश्यते एवं निचाप्यत्वे
न एवं ह्रस्वत्वेन एवं अणुपरिमाणत्वेनेति यावत् ननु अणीयस्त्वमवाप्यन्त् पसिति व्योमवच्च व्यपदेश
दिश्यते स्वाभाविकं महत्त्वं चात्र व्यपदिश्यते ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो
ज्यायानेभ्यो लोकेभ्य इति उपासनार्थमेवाल्पत्वव्यपदेशः स्थादि सर्वं खल्विदं ब्रह्म तज्जलानि
ति शान्त उपासीतेति सर्वं ... उत्पत्तिप्रलयकारणत्वेन सर्वस्यात्मतया नुप्रवेशकृतजीवनित्वे नित्यं वि पं ४
त्वेन सर्वात्मकं ब्रह्म उपासीतेत्युपासनं विधाय अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिं
ल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति यथोपासनं प्राप्तिसिद्धिमभिधाय स क्रतुं कुर्वीते
ति उपासनविधानार्थं मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा

श्री
भ०
१०२

ष्टस्तु तं प्रत्यभिज्ञायते यमोऽत्र यं प्रश्नस्तु ओदनस्सूचितः पुरुषो न चोपहतवाच्या परमात्मा ऋतं नरस्तं
पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे छायातपौ ब्रह्मविदो वदन्ति पंचाग्नयो ये च त्रिणा
चिकेताः इति कर्मफलभोक्तारौ च सद्वितीयस्याभिधानात् द्वितीयश्च प्राणो बुद्धिर्वा स्यात् न तथा
नेहि कर्मफलभोग एव सञ्च परमात्मनो न संभवति बुद्धिप्राणा यो स्तु भोक्तजीवस्योपकरणभू
तयोः यथा कथंचित्तु जीवानेऽन्वयसंभवतीति तयोरन्यतरेणासद्वितीयो जीव एव प्रतिपाद्यते न
द्वैकप्रकरणत्वात् एवं प्राप्ते नोऽत्रापि स एवं मविनुमहेतीत्युच्यते गुहां प्रविष्टावात्मानौ
हि तद्दर्शनात् तत्राणाजीवो बुद्धिर्जीवो वा गुहां प्रविष्टौ ऋतं पिबन्ताविमुच्येते अपितु जी
वात्मपरमात्मानौ हि तथा अपदिश्यते कुतः तद्दर्शनात् अस्मिन्प्रकरणे जीवपरयोरेव गुहाप्र
वेशो व्यपदेशो दृश्यते परमात्मनस्तावत् तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं अध्या
त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति जीवस्यापि या प्राणेन संभवत्यदितिर्देवता
मयी गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायतेति कर्मफलान्यत्तीत्यदितिर्जीव उच्यते प्राणेन
संभवति प्राणेन सह वर्त्तते देवतामयी [illegible] गुहां प्रविश्य तिष्ठन्ती हृदयगु १०२
हरीकोटरवर्तिनी भूतेभिर्व्यजायत पृथिव्यादिभूतैस्सहिता देवादिरूपेण विविधा जायते एवं च

इन्द्रियाधीनभोगा

न भोक्तृत्वं नहि भोक्तृत्वयानीयमानो जीव एव स्यादित्याशंकायां ॥ अत्ता चराचरग्रहणात् ॥ कठ
वल्लीष्वाम्नायते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं । क इत्था वेद यत्र स इति अ
त्र ओदनोपसेचनसूचितोऽत्ता किं जीव उत परमात्मेति संदिह्यते किं युक्तं जीव इति कुतः भोक्तृत्वस्य
कर्मनिमित्तत्वात् जीवस्यैव तत्संभवात् । एवं प्राप्ते ब्रूमः अत्ता चराचरग्रहणात् अत्ता परमात्मैव कुतस्थाव
चरग्रहणात् चराचरस्य कृत्स्नस्य भोक्तृत्वं परमात्मन एव संभवति । न चेदं कर्मनिमित्तं भोक्तृत्वं अपि तु जग
त्संहारस्थितिलक्षणं तस्य परस्य ब्रह्मणो विभ्रमाः । संहर्तृत्वं सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं प
दमित्यनेन वदर्शनात् । न चात्र मृत्युर्यस्योपसेचनमिति वचनात् ब्रह्म क्षत्रं चेति कृत्स्नं चराचरं जग
दिहौदनीयोदनत्वेन ग्रहणेनोपसेचनेनामत्वयमानं मृत्युना सदन्यस्मादनत्वेनोपसेचनत्वेनम्
योरध्यवसायमानत्वात् उपसेच्यमानस्य कृत्स्नस्य ब्रह्मदत्त्वपूर्वकस्य जगतस्त्यग्राचरस्यादनमत्र वि
वक्षितमित्यवगम्यते दर्शनाद्धनमप्युपसंहारश्रवणात्मनादीह दृश्यं जगदुपसंहारित्वं रूपभोक्तृ
वे२ त्वं परमात्मनः ॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ महान्तं विभुमात्मानं मत्वा धीरो न
शोचति नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः तस्यैष
आत्मा विवृणुते तनूं स्वाम् ... एतमेव पूर्वं वे२

श्री. ण्येन कलत्रैश्वर्यं मन्यमानेन कुमारेणानचिकेतसा त्रिकाग्नेर्मरणस्वात्मदानेन नाचिकेतः कृतः ता वि
भा. हृण्यस्मिकरणाकस्मै मां दास्यसीत्यसकृत्पितरं पृष्टवता सनिर्बन्धं रुष्टपितृवचनान्मृत्युसदनं प्र
१९ विष्टेन सत्यसदनात्प्रोषिते यमे तदर्थानातत्त्रिरात्रोपोषितक्तपो विशेषान्तौ वा स्वी ततस्तत्र विधान प
प्रवृत्तमृत्युप्रदत्तेवरत्रये आस्तिक्यातिरेकान्मृत्युमेनवरेण स्वात्मानं प्रतिपित्तुः प्रसादोपनतः ए
मा.४ नत्र सर्वदे हान्तरितत्वाल्लोकमजानतो नोपपद्यते हि तीयेन वरेणोग्नीणी देहान्तभाव्यफलसाध
नभूताग्निविद्यारत्नानन्तदप्रदेहात्रिकाल्याः नाभिवस्थानसंभवति अतस्तृतीयेन वरेण यदिदं विष
१०४ नेयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणाम
षवरस्तृतीय इति अत्र परमपुरुषार्थरूपब्रह्मप्राप्तिलक्षणमोक्षयाथात्म्यविज्ञानाय तदुपायभूत
तत्व। परमात्मोपासनपरवरणत्वं जिज्ञासया यः प्रश्नः क्रियते एवं च येयं प्रेते इति शरीरवियोगमा
त्राभिप्राय अपितु सर्वबन्धविनिर्मोक्षाभिप्रायं यथा न प्रेत्य संज्ञास्तीति अयमर्थः मोक्षापि कृते
मनुष्ये प्रेते सर्वबन्धविनिर्मुक्ते तत्स्वरूपविषयवादिविप्रतिपत्तिनिमित्तास्ति तास्मात्विकाय
यं विचिकित्सा तस्य नोदनायतत्स्वरूपयाथात्म्यं त्वयानुशिष्टोहं विद्यां जानीयामिति तथाहि व मा.२ १९
क्ष्यति विप्रतियन्ते केचिद्धि मात्रस्यात्मनः स्वरूपे कश्चित्तल्लक्षणमोक्षमाचक्षते अन्ये वित्तिमा

सति कर्मफले पिबन्ताविति व्यपदेशः छत्रिणो गच्छन्तीतिवत्। अथवा य[?]योग्यप्रयोजनकर्तृत्वे
ण पानेकर्तृत्वं जीवपरयोस्तत्यपदाने [illegible] कौ जीवपरमात्मानावेवो ८२
पास्यत्वोपासकत्वभावात्तथा पकाल विशिष्टो सर्वेन्द्रियानि पाचेन ब्रह्म जज्ञं देवमीड्यं विदित्वा नि
चाय्येमां शान्तिमत्यन्तमेतीति ब्रह्मजज्ञो जीवः ब्रह्मणो जातत्वात् ज्ञत्वाच्च तं देवमीड्यं विदित्वा
जीवात्मानं [illegible] सर्वेश्वरमात्मकत्वेनावगम्य [illegible]स्त्वयाय: सेतुरीजानानामक्षरं ब्रह्म यत्परं ना५
भयं तितीर्षतां पारं नाचिकेतं शकेमहीत्युपास्यः परमात्मा उच्यते नाचिकेतं न चिकेतस्य कर्म
णा प्राप्यमित्यर्थः आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिना उपासको जीव उच्यते तथा
विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति प्राप्य
प्राप्तारश्चेति थीयेते जीवपरमात्मानौ इहापि च्छायातपाविति तत्त्व सर्वज्ञत्वाभ्यां तावेव वि
शिष्य व्यपदिश्येते [illegible] ये यं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैक एव
तं जीव स्वरूपयाथात्म्यप्रश्नो यज्ञमतात्मवेत्यादि प्रकरणं जीवपरविति प्रतीयते इति [illegible]
वे [illegible] नहि जीवस्य देहातिरिक्तस्यास्तित्वनास्तित्वयो कार्या प्रश्नः तयोस्तत्र पूर्वं रहस्यवर्णना व२
णान्तपपत्तेः [illegible] पितः सर्वं वेदमहात्मा [illegible] सम्मापिते लाभं दीपमानंदत्तिमेकेन

श्री भा० १९

दृश्यमानः पुरुषः प्रतिबिंबात्मा उत चक्षुरिंद्रियाधिष्ठातृदेवताविशेषः उत जीवात्मा अथ परमात्मेति
किं युक्तं प्रतिबिंबात्मेति कुतः प्रसिद्धवन्निर्देशात् दृश्यत इत्यपरोक्षाभिधानाच्च जीवात्मा वा स्या
त् हि चक्षुषि विशेषेण सन्निधानात् प्रसिद्धिरुपपद्यते उन्मीलितं हि चक्षुरुद्वीक्ष्य जीवात्मनः शरी
रे स्थितिर्निश्चीयते रश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति श्रुतिप्रसिद्धेश्च चक्षुःप्रतिष्ठो देवतावि
शेषो वा एष्वेव प्रसिद्धवन्निर्देशोपपन्नो नैषामन्यतम इति प्राप्ते प्रचक्ष्महे ॥ अंतर उपपत्तेः ॥ अक्ष्यंतरस्था
त्मा कुतः एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वा
मान्यभिसंयंति एष उ एव वामनीः एष हि सर्वाणि वामानि नयति एष उ एव भामनीः एष हि सर्वे
षु लोकेषु भातीति दर्शितगुणानां परमात्मन्येवोपपत्तेः ॥ श्री स्थानादिव्यपदेशाच्च ॥ चक्षुषि
स्थितिनियमनादयः परमात्मनः एव यश्चक्षुषि तिष्ठन्नित्यादिना व्यपदिश्यंते अतश्च य एषो
ऽक्षिणि पुरुष इति स एव प्रतीयते अतः प्रसिद्धवन्निर्देशश्च परमात्मन्युपपद्यते तत एव दृश्यत
इति साक्षात्कारव्यपदेशो योगिभिर्दृश्यमानत्वादुपपद्यते ॥ श्री सुखविशिष्टाभिधानादे
व च ॥ इतश्चाक्षिपुरुषः परमात्मा कं ब्रह्म खं ब्रह्मेति प्रकृतस्य सुखविशिष्टस्य ब्रह्मण उपासन
स्थानविधानार्थं संयद्वामत्वादिगुणविधानार्थं च एषोऽक्षिणि पुरुष इत्यभिधानात् एवकारा

१९

तस्यैवकस्तेनाः विज्ञानस्तमयं परेयायाणकत्वस्यात्मनो ज्ञानाद्यशेषवैशेषिकगुणोच्छेदलक्षणं
कैवल्यरूपं यथा परेश्च परत्वरूपमात्मानमभ्युपगच्छन्ते: तस्यैवोपाधिसंसर्गनिमित्तजी
वभावस्योपाध्युपगमेन तद्भावलक्षणमातिष्ठन्ते ब्रह्मवादिनस्तु निखिलजगदेककारणस्या नि३
शेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासंख्येयकल्याण
गुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणः शरीरतयाप्रकारभूतस्या
ज्ञानन्तकलापरिच्छिन्नस्वरूपस्य परमात्मानुभवैकरसजीवस्यानादिकर्मरूपाविद्यातिरोहितस्व
रूपस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते तत्र मोक्षस्वरूपं तत्सा
धनं च त्वत्प्रसादादिमा इति तं हि केवलात्मज्ञानस्यापि स्वबोधत्वप्रदर्शनेन विविध दुर्द
भोगाविनश्वरफलभावेन चेतनपरीक्ष्य मोक्षयोग्यतामभिज्ञाय आत्मतत्त्वविज्ञानं परमा ९५
त्मोपासनं तत्पदप्राप्तिलक्षणमोक्षं च तं दुर्दर्शं गूढमनुप्रविष्टमित्यारभ्य सोऽध्वनः पारमा
प्नोति तद्विष्णोः परमं पदमित्यन्तेन उपदिश्य तापत्रविशेषानुपदिदेशेति सर्वं समंजस
मतः परमात्मैवात्मेति सिद्धं ॥ अंतर उपपत्तेः ॥ इदमामनंति छंदोगाः य एषोक्षिणि पुरु
षो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तत्र संदेहः किमयमस्याधारतया प्रति

श्री
भा०
२२२

त्सर्वमेति ज्योग्जीवति व्याधिभिरन्यथ तो यावद्ब्रह्माग्निजीवतिनास्यावरपुरुषाः क्षीयंते ब्रह्मविद्यप्रभृति
व्यादयः पुत्रपौत्रादयः श्रद्धस्वविद एवमभंतिनास्याब्रह्मविकुलेभवतीतिश्रुतंनरेवब्रह्मविद्याफल्गु तेन
भुज्यते उपवयं लभं जामोस्मिंश्चलोके अमुष्मिंश्च वयमस्य त्वमेनमुभ्युज्जामः पावडुक्ष्मग्निविदुषः
परिपालयामस्तिमतो ऽग्निविद्याया ब्रह्मविद्यायाः तेन तत्स्त्रियान्नाविशेषात्तत्र विशिष्टं प्रकृतमेव
ब्रह्मोपासनविधानार्थं गुणविधानार्थं चो च्यते नना चार्यस्तुते गतिं वक्ष्यतीति निमात्रविशेषणात्
चार्येणगतिरेवोपदिश्यतइति नास्यैतत्तत्त्वं स्थानगुणविधर्यो नोच्यतेतद्वीथन्तेनाचार्यस्तु तेगतिं
वेदत्वस्यायमभिप्रायः ब्रह्मविद्यामन्नुपदिश्यप्रोषितेगुरौनदला भादग्नीसमर्पकोसलमज्ज्वी
वपितं स्वपरिचरणाग्नीनांगार्हपत्यादयोगुरोरग्रयस्तमेब्रह्मस्वरूपमाचनतेरगभूताचाग्निदेयाम्
पदिश्यप्रभृचार्यादेयातिथाविदितासापिशुप्तपदितिश्रुतत्वं धर्मालोचसाधुनमलमप्यधर्मात्मा
र्थमुपदेशसंयद्याममनादिगुणकब्रह्मनत्रुपायकंब्रह्मतद्पासनस्थानमचिरादिकाचगतिमुपदिश
तितिमताचार्यस्तुतेगतिं वक्ष्यतीत्यवोचन्नगतिन्युक्तमुक्तामुपदेशविद्याविपोचप्ररणार्थमत एवाचा
र्योपिश्रहतते तहंसामीति पुरुषरथला धश्रापानश्रिष्यतेएवमेवंविद्विपापकर्मनश्लिष्यतेरत्तदुष्प
समयद्यामत्वादिकल्याणगुणविशिष्टब्रह्मातिष्ठानोवासमयचिरादिकाम्यगतिमुपदिदेशाग्नतं के

५२

२२२

निधाय यथा२

त्रैरूप्येदृष्टंहेतोर्दोनयतिनचाग्निविद्याव्यवधानात्केवलंश्रुतिवशकृतंब्रह्मनेदस्त्रिविधं नचाग्निविद्यापः
माणोवाचवलब्रह्मेतिकेवलंश्रुतिविद्यामुपदिश्याप्यत्रहैनंगार्हपत्योऽनुशशासेत्यादिनाग्नीनामु
पासनमुपदिदिशुः नचाग्निविद्याब्रह्मविद्याङ्गमितिवक्तुंशक्यंब्रह्मविद्याफलानन्तरंतन्नहिरोधित
वांशुः अग्निसंनस्यविद्येदाहित्फलप्रवणान् उपकोसलोब्रह्मैतदमृतमभयमेतद्ब्रह्मेत्युभयत्रब्रह्म
संशब्दनात् आचार्यस्तुतेगतिंवक्ष्यतीत्यग्निवचनाच्चगत्युपदेशाच्च एवंब्रह्मविद्याया असमाप्तत्वे
न्मध्यगताग्निविद्याब्रह्मविद्याङ्गमितितिनिश्चीयते अथपदेनगार्हपत्योऽनुशशासेतिब्रह्मविद्यायाःपृथ
किंच/ नस्यैवाग्निविद्योपदेशस्तेषांविधिः पारिप्लवोनिस्त्रिब्रह्मनाम्निव्यतिरिक्तंनानाविधकामापहतिदूर्वगार्न्
नस्यजरामरणादिभयभयामिनमायोयकोमलनाथेनात्तोप्यतेअस्यहिग्रन्थविद्याचेतिसम्बन्धित्वा
तद्विद्यौ पदेयान्मोदेकफलांगत्वमग्निविद्यायाः अतोयतेवंचागानेःवगानेसतिफलानुकीर्तनमनर्थकंवा
हत्तिरगम्यते नचेमान्त विरोधिफलंकिंचिद्वयनेअपहतेपापकृत्यांलोकीभवतिसर्वमायुरेति
१२ ज्योग्जीवतिनास्यावरपुरुषाः क्षीयन्तेउपवयंतंभुञ्जामोऽस्मिंश्चलोकेऽमुष्मिंश्चेत्यमीषांफलानांमो
क्षाधिकृतस्यानुगुणत्वात् अपहतेपापकृत्यांब्रह्मप्राप्तिविरोधित्वाच्चपापकर्माभिहत्यलोकीभवतिन
हिदोषिनिपायेनिरस्तेवब्रह्मलोकंप्राप्नोतिसर्वमायुरेतिब्रह्मोपासनपरिसमाप्तेयोवरायुरपेक्षितंत

जानामीत्युक्तवान् उपकोसलस्य ममाप्याणं जानंतो गुणोपदायं देवं न तदेव कमिति किं ब्रह्म तत्त्वरूपं तदेवखं
श्री एतमेवाप्यमिच्छि च भित्यर्थः अतः प्राणशरीरत्वात्प्राणो विशिष्टपदं न तदेवाचरति किं तस्य स्वरूपं चेति
भा निगमितं प्राणं च ब्रह्मेति दाकाशं चोचुरिति अतः कं ब्रह्म खं ब्रह्मेत्यत्र चापरि किं तस्य खं ब्रह्म प्रतिपादित
१-२२ मिति एवं ब्रह्मैवात्र प्रकृतं तदेव चात्रास्माधारणतयाभिधीयत इत्यत्राधारः परमात्मा श्रीभगवानेव नि
त्यगमाभिधानाच्च एतेनोपनिषत्कस्याग्निना परमपुरुषप्राप्त्यर्थनुसंधेयत्वयाक्रयत्नेन श्रुति
यागमानाच्चिरादिकागतिर्गीतानामस्पृति राहुतिल त्रयापरमपुरुषप्राप्तिकरीमुपकोसलायाभिहितु
रूपं सूत्रवते तेन विषमेवाभिसंभवति अर्चिषोहः अह्नः आपूर्यमाणपक्षमित्यारभ्य चंद्रमसो विद्यु
तं तत्पुरुषोमानवः स एनान् ब्रह्म गमयति एषदेवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानव
मावर्तं नावर्तंत इत्यनेनोपदिष्टं तीयतोऽप्य परमात्मपुरुषः परमात्मा अनवस्थितेरसंभवाच्चेतरः
प्रतिविंबादीनाममृतत्वाभिधानेनानवस्थानादमृतत्वादीनां चैकस्य पारमार्थिकानां तेषु संभवात्तु परमा
त्मनः इतरच्छायादेरतिपुरुषो भवति तमहं तेविंबस्य तावस्सरूपं तरस्सन्निधानाय तत्तिथमेनावस्था त्वान्म३
नसंभवः जीवस्यापि सर्वेंद्रियव्यापारानुगुणत्वात्परसर्वेंद्रियकेदेहेनेत्यानविशेषेणहृत्स्थितिश्च तत्रापि १-२२
नावस्थानं देवतायाश्चरश्मिभिरेषोऽस्मिन्प्रतिष्ठित इति रश्मिद्वारेणावस्थितिवचना देशान्तरावस्थि

प्रति३

अस्थूलं ब्रह्मेति स्थूलत्वविशिष्टस्यैव ब्रह्मणोऽभिधानादपसत्याधारः पर्यन्तात्मत्वकं ब्रह्मेति पुरं ब्रह्मा बृ॰स्थं
भिधीयते इति कथमवगम्यते यस्येदाद्याधारं याभिधानं [illegible] केवलं ब्रह्मेति प्रसिद्धाकाशो लौकिक
व्यो ब्रह्म दृष्टिर्विधीयते इति प्रतिमा तिनाम ब्रह्म मनो ब्रह्मेत्यादि वचनस्तादृश्याद्व्रह्म घीअत एवं च ५२
सर्वत्र अतस्तत्र एवं चकं तदेव खमिति स्वतंविशिष्टस्याकाशस्याभिधानं अत एव खशब्दाभिधेयः
स्याकाशः परं ब्रह्म एतदुक्तं भवति श्रुतिभिः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेत्युक्ते उपकोसलः उवाच जानाम्यहं कं बृ॰५
यत्प्राणो ब्रह्म कं च खं च न जानामि त्वस्यापि नभिप्रायः जलवत्प्राणादि प्रतीकोपासनमग्निभि
रभिहितं जरामरणादिभयभीतस्य मम ज्योत्स्नेषु एवं तत्त्वात्स्य नोब्रह्मेत्येवायास्यमर्यादृष्ट
तत्र प्रसिद्धः प्राणादिभिः समानाधिकरणो ब्रह्मनिर्दिष्टस्तेषु च प्राणविशिष्टं तेन तादृशरूपा योग
५ नं प्राणशरीरत्वं पाद्वास्यतियं तत्रेनत्वाब्रह्मणाद्यपपत्तं इति विजानाम्यहं यत्प्राणो ब्रह्मेत्युक्ते त ५
बृ॰८ तु तथा स्वस्वाकाशपारंपरिं शरीरतयानाश्रियमाणे न विशेषणत्वमुत्तम्योऽन्यवच्छेदकतयानिरतिशय
५२ यदेहरूपब्रह्मस्वरूपसंधातापरत्वे न यानत्रयेण कमतयोः शरीरतयाविशेषणत्वे वैषयिकसुख
भूताकाशयोर्नियामकत्वं ब्रह्मणः स्यादिति स्वरूपेणावगतिर्न स्यात् अन्यूमव्यवच्छेद्व तत्परं किञ्च

प्राणात्प५

श्री° यं दिनयाद्वेसंतीति ज्ञात्वा तदर्थमपि देवादिलोकादिष्वशुभयोरुपादानं तदेवमुभयेष्वपि वाक्येषु त ९२
स्यामी परमात्मेत्यर्थः अतः तच्छब्दव्यपदेशात् परमात्मधर्मोपदेशत्वादेकवचसन्नसर्वलोकसर्वभूतसर्वदे
भा° १२१ वादीन्नियमयतीत्यर्थः सुदालकप्रश्नः इमं च लोकं परं च लोकं सर्वाणि भूतानि यो न्तरो यमयतीत्युपक्र
म्य तमन्तर्यामिणं ब्रूहीति तस्य चोत्तरं यः पृथिव्यां तिष्ठन्नित्यारभ्योक्तं तदेतत्सर्वान् लोकान् सर्वाणि
च भूतानि सर्वाणि च देवताःनि सर्वान् वेदान्सर्वान् यज्ञानेनः प्रविश्य सर्वप्रकारनियमनं सर्वशरीरत
या सर्वस्यात्मत्वं च सर्वज्ञात्मत्वसंकल्पात् पुरुषोत्तमादन्यस्य न संभवति तथाहि अंतः प्रविष्टः शास्ता
जनानां सर्वात्मा तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदित्यादीन्युपनिषद्वाक्या
सर्वे नि परमात्मन एवैष प्रशास्तृत्वं सर्वस्यात्मत्वमित्यादीति वदंति तथा सुबालोपनिषदि नेव ह किंच
नाग्र आसीत् अमूलमनाधारमिमाः प्रजाः प्रजायंते दिव्यो देव एको नारायणः चक्षुश्च द्रष्टव्यं च नारायणः
श्रोत्रं च श्रोतव्यं च नारायण इत्यारभ्योक्तं शरीरे निहितो गुहायामज एको नित्यः यस्य पृथिवी शरीरं
यः पृथिवीमंतरे संचरन् यं पृथिवी न वेद यस्यापः शरीरमित्यादि यस्य मृत्युः शरीरं यो मृत्युमंतरे ९३
संचरन् यं मृत्युर्न वेद एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति परस्यैव ब्रह्मणः
सर्वात्मत्वं सर्वशरीरत्वं सर्वनियंतृत्वं च प्रतिपाद्यते स्वाभाविकं चामृतत्वं परमात्मन एव धर्मः न च य

तस्यां नीरूप्यतिष्ठन्नोपपद्येतेनं चलत्यवस्थानं न वेत्यामेवैयोनिरूपाधिकाः न त्वात्तद्योनत्वं भवेत्येवत
स्मादलिङ्गरूपः परमात्मा स्थानादिव्यपदेशाच्चेत्यत्र पञ्चमत्वमिति इति श्रुत्यादिना श्रुतिपाद्यमानं च तत्त्ववि
स्थितिनियमादिकं परमात्मनः एवेति सिद्धं कृत्वा तद्रूपस्य परमात्मत्वं साधितं इदानीं तदेव सम
र्थयते अन्तर्याम्यधिदैवादिलोकादिषु तद्धर्मव्यपदेशात् पृथिव्यादिना श्रुत्या जनमनेपुनः
समाम्नाति यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्त
रो यमयति एष त आत्मान्तर्याम्यमृत इति एवमेवं प्रपञ्चं तत्त्वादित्यादिषु चन्द्रतारकाकाशतमस्ते
जस्सु सर्वेषु भूतेषु च तथैव प्राणवाक्चक्षुः श्रोत्रमनस्त्वग्विज्ञानरेतस्सु आत्मा अन्तर्यामी एष च तिष्ठन्
न तदन्तरभूतं तत्तद्देवैतन्न शरीरकं तत्तन्नियमयतं कं चिदिदं एव एष त आत्मान्तर्याम्यमृतः इति च वि
शेषवन्तं संश्राव्यते किमन्तर्यामी प्रत्यगात्मा उत परमात्मेति किं युक्तं प्रत्यगात्मेति कुतः वाक्यशेषा
त् वाक्यशेषे द्रष्टा श्रोतेति करणायत्तज्ञानत्व श्रुतेः एवं प्राप्ते अन्तर्यामिणोपदेशात्तु नान्यो
नोऽस्ति द्रष्टेतः श्रोतेति निषेधाद्वेद्यं अन्तर्यामी अधिदैवादिलोकादिषु तद्धर्मव्यप
देशात् अधिदैवादिलोकादिपदश्रुतिहितेषु लोकेषु स समस्तानन्तर्यामीय पहतपाप्मा परमात्मा
नारायणः कार्त्स्न्येनैव सर्वेभ्योऽपि देवादिभ्योऽधिभूताधिलोकादिषु मेतिवाक्यानि मा

द्रष्टुपरिदृश्यते सा अंदिनपाठेतु यः सर्वेषु लोकेषु तिष्ठन् यः सर्वेषु वेदेषु यः सर्वेषु यज्ञेषु तिष्ठन्निति च पठ्यते

ह् श्रीऽभयेषिहिसेदंनेनममिमीयते उभयेमाअंदिनाकात्वा च श्रंनर्थोस्तितोनिपास्यत्वेनवाराद्विभिद्ये
श्री तत्ते: समसेनं प्रारीरमुपिविभम्याधीयतेयश्चात्मानिति श्रुत्यन्तमतो: नरोपूमात्मानवेदयस्यात्मापारीर
भा॰ यश्चात्मात्मनमंतरोयमयतिसनआत्मांतर्याम्यमृत इति माध्यंदिनपाठो विशेनेति छन्दिस्यादिवकाण्वाः
११५ परमात्मनिपात्म्यनयातस्माद्विलक्षणत्वेनैनमधीयतइत्यर्थः अतोनाविदितमीस्वरात्मनोविलक्षणे
पहृतपाप्मापरमात्मानात्मजन्म इतिसिद्धं श्रीअदृश्यत्वादिगुणकोधर्मोक्तेः आधुर्वे तिकाअधीय
तेअक्षरपरायया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं
नित्यंविभुंसर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः इति तथा अक्षरात्परतः परः
परइतितत्रसंदिह्यते किमिदमदृश्यत्वादिगुणकमक्षरं अक्षरात्परतः परः प्रकृतिपुरुषावथोभय
ग्रयस्मात्मैवेति किं प्राप्तं प्रकृतिपुरुषाविति कुतः अस्यादक्षरस्यादृष्टत्वद्रष्टृत्वादेर्विवक्षत्वादिचेत
विशेषा॰ तद्धर्मैरुच्यते अक्षरात्परतः परः इति च सर्वज्ञाद्यिकारात्परभूतादक्षरात्परः तेनोक्तः सम
ष्टिपुरुषः प्रतिपाद्यतेऽलक्षणं भवति रूपादिमत्स्थूलरूपं चेतनं पृथिव्यादिभूताश्रयं दृश्यत्वा
दिकं प्रतिषिध्यमानं पृथिव्यादिसजातीयसूक्ष्मरूपमचेतनमेवायस्याप्यपतितं प्रधानमेवतस्मा १॥
त्परत्वं च समष्टिपुरुषस्यैव प्रसिद्धं तदधिष्ठितं च प्रधानं महदादिविशेषपर्यन्तविकारजातं प्रसूत

113

रस्यात्मनः करणाय नत्वरत्वादिकमपि तत्स्वभावं एवं सर्वेतत्वात्तस्य सेककल्पता च स्वतन्त्र एवं तथा
नियतिः स एव । स च तु : स्वगुणोत्यकर्मैः पाणिपादोजवनोग्रहीतेति न च दर्शन श्रवणादि
फलप्राप्त्यादिकरणजन्मनो ज्ञानस्य वाचका अपि तत्त्वप्यादि सा ज्ञानाकारस्य सचक्षुरादि साला
त्कारः कर्मनिरोहितस्वाभाविकज्ञानस्य जीवस्य चक्षुरादिकरणानन्तापरस्य तत्स्वतन्त्र एव नान्यो तो
स्ति द्रष्टेत्य तदपि पूर्ववाक्योदितानियन्तृ ईक्षितुरन्यो द्रष्टा नास्तीति वदति [illegible] पृथिवी न वेद यमात्मा ५५
नवेदेवमादिभिर्वाक्यैर्विव्याप्तादिति पृथग्व्यपलभ्यमान एव नियमयतीति तस्यैवोक्तेः न देवादृष्टो
द्रष्टाश्रुतो श्रोतेति निगमयन्नान्योतोऽस्तीत्यादिना तस्य नियन्तृनियम्यं च न रं तिपि ध्यत्त एव न मात्मा
सन आत्मेति तरतिव्यतिरेकविभक्तिनिर्दिष्टस्य जीवस्यात्मत्वोपादिश्यमानो नर्यामी न अत्यगात्मा
भवितमर्हति योऽन्तर्यामी [illegible] स्वात्मं प्रधानं शारीरो जीवं सार्श्विधा
शरीरस्यान्तर्यामी अतस्मोभिलापात्तयोरसंभावित धर्माभिलापात् स्वभावत एव सर्वस्य द्र
ष्टृत्वं सर्वस्य नियन्तृत्वं सर्व [illegible] त्मत्वं सतत एवामलत्वं च तयोर्न संभावनानां धर्म इति [illegible]
नियाम्यात्मेन चेतनस्य सर्वज्ञत्वनियन्तृत्वसर्वात्मत्वादिकं नार्हतीति तथा जीवाद्यन्तर्ह्रमेत्वादित्यन्त
[illegible] [illegible] ये तं चेतनं तरमा

श्रि

श्री दित्वात् आह । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह इति सर्वविद्याप्रतिष्ठा ब्रह्म
भा विद्या ब्रह्मज्ञानात्परविद्यैव च सर्वविद्याप्रतिष्ठा तामिमां सर्वविद्याप्रतिष्ठां विद्यां च तत्संप्रदायक्रमेण विद्या
ब्रा० रूपरंपरयाऽङ्गिरसः प्राप्तिं ज्ञात्वा शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ कस्मिन्नु भ
१ गवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ब्रह्मविद्यायाः सर्वविद्याश्रयत्वात् । ब्रह्मविज्ञानेन सर्वं वि
ज्ञातं भवतीति ज्ञात्वा ब्रह्मस्वरूपमनेन पृष्टं तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मवि
दो वदन्ति परा चैवापरा चेति

[illegible] ब्रह्मज्ञाने द्वे विद्ये वेदितव्ये ब्रह्मविषये
परा चापरा च परोक्षरूपे ज्ञाने अपरा देवम् अथ परोक्षं शास्त्रजन्यज्ञानेन परोक्षयोगजन्यज्ञा
नेन तथा चैतत्प्राप्त्युपायभूतमपरोक्षज्ञानं तत्त्वमसि रूपापत्ररूपं वेदवाक्यैर्न लभ्यः इत्यन्नेव द
विरोध्यप्रमाणत्वात् उपायभूतागमजन्यविवेकादिसप्रकारानुगृहीतज्ञानं तमेतं वेदानुवचनेन ब्रा
ह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतेः आद्यचमनानन्तरं पराशरः तस्मात् १९५
हेतुज्ञानं च कर्मचोद्यं महामनेश्रागमोत्थविवेकाद्द्विधा ज्ञानं तथोच्यते इति तत्रापरा ऋग्वेदो

114

त्रस्तित्रसहसंतारभ्यमुख्यनेपयोर्गुणानामि: स्त्रजानेस्य हन्तेचयथा पृथिव्यामोषधयः संभवंतियथा
सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमितिश्रुतेः भिन्नकरणोपादानपुरुषा
वेवअतिपाठेनसत्येवप्राप्ते भिन्नीयते सर्वज्ञत्वादिगुणकोपमाने: सर्वज्ञत्वादिगुणकोक्ष
रात्परतः परस्यपरमपुरुषस्यैवज्ञानानन्दमोक्षे: यःसर्वज्ञः सर्वविदित्यादिनासर्वज्ञत्वादिकमक्ष
रस्यैवधर्मा: उच्यन्ते तन्ममन्यायात दक्षरमपिगम्यतइत्यादिनासर्वज्ञत्वादिगुणकमक्षरम
भिधायतथाक्षरात्संभवतीहविश्वमितितस्माद्विश्वसंभवंचाभिधाययः सर्वज्ञः सर्वविद्यस्य
ज्ञानमयंतपः तस्मादेतद्ब्रह्मनामरूपमन्नंचजायतइतिभूतयोनेरक्षरस्यसर्वज्ञत्वादिप्रतिपा
द्यतेयस्मादक्षरात्परतः परइतिचप्रकृतमहत्वत्वादिगुणकमभूतयोन्यक्षरं सर्वज्ञमेवपरत्वेन
व्यपदिश्यतेअतोऽक्षरात्परतः परस्यात्मरूपत्वं यच्चमतः प्रकृतमहत्त्वादिगुणकमक्षरं
नाभिधत्ते तस्य सर्वज्ञस्यविश्वयोनेः सर्वस्मात्परत्वेनतस्मादक्षरस्यपरत्वासंभवादतोवाक्ष
रशब्देनभूतसूक्ष्ममचेतनमुच्यते श्रीविशेषणभेदव्यपदेशाभ्यांचनेतरौ इत्यत्रप्रधानपुरु
षौविशिनष्टिहिप्रधानात्स्वरूपाच्च भूतयोन्यक्षरं व्यावर्तयतीत्यर्थः एकविज्ञानेनसर्ववि
ज्ञानोपपादनादिभिः तथा ताभ्यामन्यत्वरस्यभेदव्यपदिश्यतेअक्षरात्परतः परइत्या

प्रकरणा२

नृ

अतः । मंत्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा संततानि तान्याचरत नियतं सत्यकामा इति
श्री भा° सार्वज्ञसत्यसंकल्पत्वादिकल्याणगुणाकरमनन्तं पुरुषं सत्वतः सत्यं नियतं कामयमानानां तल्लिप्सा एष प
११ लोकं तेभ्यो विरक्ता अत्यपनुः सामार्थ्यं वस्तुकविभिर्दृष्टानि वर्णाश्रमोचितानि अग्निषु बहुधा संततानि निर्वेता ३
कर्माण्याचरतेति एष वः पन्था अन्याय्यारभ्यस्य वर्णाणस्य सुकृतो ब्रह्मलोकः स्यं तेन कर्मानुष्ठानप्रकारं
क्रपु ष्मृतिस्थितिचोदितेषु कर्मसु ...नरकर्म वैयर्थ्यं यीनवैरामनन्तादिनानामपि निष्फलत्वमपयानदृष्टि
सर्६ तस्योचानन्तदृष्टिर्मतत्वं विधायं ल्पवास्मितेः इत्यादिना न्यायप्रतिपादनमाह अवरं येषु कर्मप्रतद्धेयोऽपेः
मितं दतिसूत्रः जरामृत्युं तेपुनरेवापियंतीत्यादिना फलाभिसंधिपूर्वं कर्तॄन् ज्ञानविधुरतया
चापरं कर्माचरतापुनरपुरस्त्वितिमज्ञानयः ष्ठ्रदेये युयवसंतीत्यादिना पुनरपि फलाभिसंधिरहित
ज्ञानेनानुष्ठितं कर्मब्रह्मप्राप्तमेव भवतीति परीक्ष्य परीक्ष्य लोकानित्यादिना केवलकर्मफले पुंवि
रक्तस्य पद्योचितकर्मानुगृहीतेव्रह्मप्राप्त्युपायभूतं ज्ञानं तिज्ञासमानस्य चार्थ्यायस्तदन्तं वि
धायतदेवं तस्य यथा सुदीप्तादित्यादिना सो विद्याग्रंथिं विकिरतीह सोम्येत्यन्तेन पूर्वोक्तस्याक्ष
रस्य भूतयोनेः परस्य ब्रह्मणः परमपुरुषस्याक्षैः स्वरूपगुणैः स्वहस्वसर्वभूतान्तरात्मतया
विश्वशरीरत्वेन विश्वरूपत्वं तस्माद्विश्वसृष्टिं च विस्पष्टमभिधाय स्वौ विश्मविहितमित्यादिनातस्मै ११६

यज्ञैर्विरक्त्यादिना धर्मशुश्रूषार्यामित्येतेन धर्माज्ञानो स्यं ब्रह्मोंकारेहेतुभूतं यतो तज्ज्ञानमुक्तं सांगस्य
इतिहासपुराणस्य सधर्मशास्त्रस्य समीमांसस्य वेदस्य ब्रह्मरत्तानो न्यनिर्दिष्टं हेतुभूतं तत्त्वज्ञानं अथ परा
यथानदंदरमधिगम्यते इत्युपासनाख्येत्रस्य शास्त्राकारलक्षणं भक्तिरूपाय च ज्ञानम् च्यानेयमद
द्वेष्यमित्यादिना परो लापरो लक्षणं यज्ञानं द्वयविधयस्य परस्य ब्रह्मणः स्वरूपं च्यानेयवोर्णिनाभिः
सज्ञेनेयरहितेचेत्यादिनाय थोक्तस्य सान्तरस्य ब्रह्मणोलक्षणं जन्यस्य चुतत्ता चेतनात्मकस्य
चरस्योत्पत्तिरुक्ता विश्वमिति वचनाच्च चेतनमात्रस्य तपसा चीयते ब्रह्म ततोन्नमभिजायते अन्ना
त्प्राणो मनः सत्यं लोकाः कर्मसु चामृतमितिच्छ्रयणो विश्वो मनिज्ञ प्रकारेणोत्पन्नेतेन यस्मात्ज्ञाने नयस्य
ज्ञानमयं तपः इति वचनमात्रत्वाच्चीयते उपचीयते वृद्ध्यामिति संकल्परूपेण ज्ञानेन वृद्धमेव
न्मुखं भवतीत्यर्थः ततो ऽन्नमभिजायते यस्य तत्त्वज्ञविश्वस्य भोक्तृवर्गस्य भोग्यमन्नं तत्त्वमव्या
कृतं परस्माद्ब्रह्मणो जायते तत्र्यर्थः प्राणमनः प्रभृति च सर्वार्थपर्याय रूपयकलसाधनभूतं कर्मपर्यं
तं सर्वं विकारजातं तस्मादेव जायते यः सर्वज्ञः सर्वविदित्यादिना तस्यापुपकरणभूतस्य वेत्त
सत्यसंकल्पत्वादिकमुक्तं सवैजात्यस्य संकल्पात्परस्माद्ब्रह्मणों ऽत्तरादेतत्कार्याकारं ब्रह्मना
मरूपविभक्तभोक्तृभोग्यरूपं जायते तदेतत्सत्यमितिपरस्य ब्रह्मणो निरुपाधिकसत्यत्वम्

श्री
भा
९१

116

किं ब्रह्मेत्यस्य निर्णयस्येत्युक्तं वैश्वानरशब्दस्य च लौकिकप्रयोगदर्शनाज्जाठराग्नेस्तावदयम
ग्निर्वैश्वानरः येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोतीति अयं दो
ऽग्निरिष्यतां भवतीत्यनेन घोषं शृणोतीति महाभूतस्तृतीयश्च विश्वस्मा अग्निं भुवनाय देवाः वैश्वान
रं केतुमह्नामकृण्वन्निति देवतायां च वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री
रिति परमात्मनि च लक्षणात्मन्येव हृदयेऽग्नौ वैश्वानरे प्रयुज्यमानत्वात्स वैश्वानरो विश्वरूपः
प्राणोऽग्निरुदयत इति च वाक्योपक्रमादिषु चोपलभ्यमानान्यपि लिङ्गानि सर्वाण्युपरागेण तथाने
नैशाव्यानीति ... भिधीयते वैश्वानरस्य साधारणशब्दविशेषात् वैश्वानरः परमात्मा ऊ
नः साधारणशब्दविशेषाभ्यां विशेष्यत इति विशेषः साधारणस्य वैश्वानरशब्दस्य परमात्मा
साधारणोऽर्थं मे विशेष्यमाणत्वादित्यर्थः तथा प्राचीनशालौपमन्यवादयः समेत्य को न आत्मा किं ब्रह्मे
ति विचार्य उद्दालकं वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्या
गच्छामेति उद्दालकस्य वैश्वानरात्मविज्ञानमवगम्य तमभ्याजग्मुः स चोद्दालक एतान् ९२
वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति ते चोद्दालकः प्रष्टारमश्वपतिमभ्याजग्मुः स च तान्
महर्षीन् यथार्हं पूजयाभ्यर्च्य न मे स्तेनो जनपद इत्यादिना यक्ष्यमाणो ह वै भगवन्तोऽहमस्मीत्यनेनात्म

९१ नो वैश्वानरत्वमित्वा तमनभिज्ञ मनस्याकृतं वेदि
त्वमत्वा तानुवाचाध्यापि भगवन्तो ममतोऽमम
त्मानः

वाचकस्याव्याकृतात्परतोपि शुद्धत्वात्परमुत्तमस्य वरस्य ब्रह्मत्वात् परमत्वोक्तिः प्रतिष्ठितस्यानवच्छि
कातिशयानंदस्वरूपस्य हृदयगुहायां मनसोपासनप्रकारमुपासनस्य च भक्तिं तत्फलं चोपासीनस्या
विद्याविषयोकस्य लैकैकस्य लक्षणं समस्तस्यान्नमवफलं चोपदिशन्युपसंहरति अतएव विशेषणान्युद्दिश्य
देशगतनास्तिमत्करतो प्रधानपुरुषो भगतिपायोते भेदस्य पदेशोपिहितास्यांपरस्यब्रह्मणो न
ति यतेहि व्याग्रमूर्तं पुरुषः सर्वात्मकस्तयोग्यं तः असावलोत्र मनतः शब्दो ब्रह्मतत्वात्परतः परः
